पश्यंति तस्मादन्नप्रदोवरः १८ योतिथिंभक्तितोराजनसुमुधमप्यपयाविधि
७५ ।अन्नदोमोक्षमाप्नोति तस्मादन्नप्रदोवरः १९ पादाभ्यंगंभक्तियोतिथेःकु
रुते नरः सन्नातःसर्वतीर्थेषु गंगास्नानपुरःसरं २० तैलभ्यंगंमहारा
ज ब्राह्मणानांकरोति यः सन्नातोऽब्धुश्चतंसा प्रगंगायांनात्र संशय २१
रोगितान ब्राह्मणानयस्तु रक्षति दितिरक्षकं सकोटिकुलसंयुक्तोवसे
द्ब्रह्मकुलेयुग २२ योरक्षेत्पृथिवीपालयंकंवारोगेणांनरं तस्यविष्णु
प्रसन्नात्मासर्वानकामानप्रयच्छति २३ मनसाकर्मणावाचायोरक्षेता पुंरा:
मयाविनं सर्वानकामानवाप्नोति सर्वपापविवर्जितः २४ योददातिम ७५
हीपालनिवासंब्राह्मणायवै तस्यप्रसन्नोदेवेशः सर्वंनिवासंप्रयच्छति

२५ ब्राह्मणायक्षमविदे योदद्यात्तांपयस्विनी सयातिविष्णुभवनंममनेवाम
पिदुर्लभ २६ आमन्नेभ्यःप्रतिगृह्यापियोदद्याज्जांमहीपते तस्यपुण्यफलं
वक्तुंनाहंशक्नोऽस्मि पंडित २७ कपिलांवेदविदुषेयोददाति पयस्विनी
।सएवरुवरुभूपालसर्वपापविवर्जितः २८ वेदाध्यायन्नविदुषेददाति
भयतोमखी नतस्यपुण्यसंख्यानुनक्षमे द्रष्टांतैरपि २९ योदद्यात्मभयंभू
पभयविकलचेतसं तस्यपुण्यफलंराजनृम्रणुवक्ष्यामितत्वत ३० एकतः
क्रपवःसर्वसमग्नवरदक्षिणाः।एकतोभयभीतस्यप्राणिनःप्राणरक्षेण
३१ संरससतिमहीपालयोविप्रभयविह्वलं संस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदी
क्षितः ३२ वस्त्रदोरुद्रभवनंकमारोब्रह्मणःपदं हेमदोविष्णुभवनंसयाति
कुलसंयुतः ३३ यस्तुकन्यामलंकृत्यददात्यध्यावेदिने शतवंशसमायु

 कोब्रह्मणःपदमश्नुते ३४ कार्त्तिक्यांपौर्णमास्यांवाआषाढ्यांवापिभूपते
 वृषभंशिवतुष्ट्यर्थमुत्सृजीणांफलंशृणु ३५ सप्तजन्मार्जितैःपापैर्विमु
क्तोरुद्रपणाकं कुलसप्ततिसंयुक्तोरुद्रेणसहमोदते ३६ शिवलिंगांकितं
कंचामहिषंयःसमुत्सृजेत्नतत्स्यपातनोलोकद्वयेनभवतिप्रभो ३७ ताम्बू
लदानंयःकुर्यात्तश्रक्तितोनृपसत्तम तस्यविष्णुःप्रसन्नात्माददातिश्रीयुतंफ
लं ३८ क्षीरदोहद्गलद्रम्भवेवमधुदोहदधिद्रस्तपादियासुतपर्यंतस्वर्गलोकेम
हीयते ३९ प्रयातिवैदुग्धवनंमिक्षुदानात्पयोत्तमगंधदःपुष्पदःप्रा
यातिब्रह्मणःपदं ४० गुडेक्षुरसदश्चैवप्रयातिक्षीरसागरं मठानांजल
दोयातिसूर्यलोकमनुत्तमं ४१ विद्यादानेनसायुज्यपमतिदानंयतःस्मृतं
विद्यादानंमहीदानंगोदानंचोत्तमोत्तमं नरकादुद्धरंत्येवजपवापलधेद्

नात् ४२ सर्वेषामेवदानानांविद्यादानंप्रशस्यते विद्यादानेनसाज्यंसत्व
भवतिभूपते ४३ नरास्त्रिंधनदानेनमुच्यतेद्युपपातकैः शालिग्राम
शिलादानंमहादानंप्रकीर्त्तितं ४४ यद्द्वामोक्षमाप्नोतिलिंगदानेत
थैवच ब्रह्मांडकोटिदानेनयत्फलंलभतेनरः तत्फलंसमवाप्नोतिलिं
गदानप्रभावतः ४५ शालिग्रामशिलादानेनताडपिद्विगुणंफलं
शालिग्रामशिलारूपीविष्णुरेवेतिष्ठुतः ४६ योददातिनरोदीपंमठेषुम
हतांप्रभो गंगास्नानफलंतस्यक्षणोभवतिभूपते ४७ रत्नान्वितसुव
र्णस्यप्रदानेनपोत्तम भुक्तिमुक्तिमवाप्नोतिमहद्दानंयतःस्मृतं ४८
नरोमाणिक्यदानेनपरंमोक्षमवाप्नुयात् ध्रुवलोकमवाप्नोतिवज्रदाने
नभूपते ४९ स्वर्गेविष्णुमहानेनमौक्तिकैःसोमसंनिधि वैदूर्यदेरुद्रलो

नारदीः कंचुप्रागप्रदस्तथा ५० पुष्परागप्रदानेनसर्वत्रसुखमश्नुते अश्वि-
नोर्लोकमाप्नोतिअश्वदानेनभूपते ५१ गजदानेनमहतासर्वान्का-
७१ मानवाप्नुयात् प्रयानियानदानेनविमानाधीशतोनरः ५२ महिषीदा-
जयत्येवहममृतुल्युनसंशयः गवान्नणप्रदानेनरुद्रलोकमनुत्तमं ५
३ वारुणंलोकमाप्नोतिमहिशलवणप्रदः स्वाश्रमाचारनिरताःसर्वभू-
तहितेरताः ५४ अदांभिकागतासूयाःप्रयांतिब्रह्मणःपदं परोपदेश-
निरताःवीतरागाविमत्सराः ५५ हरिपादार्चनरताःप्रयांतिब्रह्मणः
पदंसत्संगाल्लादनिरताःसत्कर्मसुसदोद्यताःपरापवादविमुखाःप्रयां पुराः
तिब्रह्मणःसभां ५६ नित्यंहितकरायेतुब्राह्मणेषुचगोषुच परस्त्री ७१
संगविमुखानपश्यंतियमालयं ५७ जितेंद्रियाजिताहारागोषुक्षाता

:सुशीलिनंब्राह्मणानांहितकराःप्रयांतिपरमंपदं ५८ अग्निशुश्रूष
वश्चैवगुरुशुश्रूषवस्तथा यतिशुश्रूषकश्चैववनतेसंसृतिभाजिनः ५
९ सदादेवार्चनरताःसदानामपरायणाः प्रतिग्रहनिवृत्ताश्चप्रयांति
परमंपदं ६० अनाथविप्रकूणपंयेदहेपुर्नृपोत्तम अश्वमेधसहस्र
णांसहस्रंफलमश्नुते ६१ पत्रैःपुष्पैःफलैर्वापिजलैर्वामनुजेश्वर पुज
यारहितंलिंगंअर्चयेत्तत्फलंशृणु ६२ चलुकोदकमात्रेणशून्यलिंगज
नाधिप स्तथाश्वमेधलक्षाणांफलंप्राप्नोत्यनुत्तमं ६३ यःपत्रैःकुसुमै
र्वापिशून्यलिंगप्रपूजकः अश्वमेधायुतफलंसहस्रगुणितंभवेत्
६४ भक्ष्यैर्भोज्यैःफलैर्वापिशून्यलिंगप्रपूजकः शिवस्यायुज्यमाप्नोति
पुनरावृत्तिदुर्लभं ६५ पूजयापरहितंविष्णुयोचयत्यकविज तस्यपुण्य

नारदी: फलंश्चवक्ष्येऽवदनस्तन्निशामय ६६ जलेनस्नापयेयस्तुपूजारहि
७८ तमच्युतं सयातिविष्णुसालोक्यंकुलेसप्ततिसंयुतः ६७ देवतायतने
राजनेकुर्यात्सन्मार्जनंनृप यत्फलंसमवाप्नोतितत्तेनिगदितंशृणु
६८ यावंतःपांसुकणिकाःसम्यक्सन्मार्जितान्नृप तावद्युगसह
स्राणिविष्णुलोकेमहीयते ६९ शीर्णस्फुटितसंधानंयःकरोतिनृ
पोत्तम शिवस्यायतनेवापिविष्णोर्वाशृणुतत्फलं ७० शतजन्मार्जि
तैःपापैस्मुक्तोवंशत्रयान्वितः स्थित्वाविष्णुपुरेकल्पंतत्रैवपरिमुच्यते
७१ यस्तुदेवालयेराजन्अपिगोचर्ममात्रकं जलेनसेचनंकुर्यात्त पुरा:
स्यपुण्यफलंशृणु ७२ यावंतःपांसुकणिकाद्रवीभूताजनेश्वर ७८
तावज्जन्मार्जितैःपापैःसद्यएवप्रमुच्यते ७३ गंधोदकेनयोमर्त्योदे

वतायतनंनृप भक्तितःसेचनंकुर्यात् तस्यपुण्यफलंशृणु ७४ द्रवीभूता
नियावंतिरजांसिमनुजेश्वर तावत्कल्पसहस्राणिहरिसारूप्यमश्नुते ७
५ मृद्धातुविकारैर्वादेवतायतनंनृप कुर्वन्त्रयसमेतस्तुविष्णुलोकेचि
रवसेत् ७६ शिलाचूर्णेनयोमर्त्योदेवतायतनेनृप करोतिस्वस्तिकादी
नितस्यपुण्यफलंशृणुः ७७ यावंत्यःकणिकाभूमौस्थितास्वस्तिकोद्भव
ताद्युगसहस्राणिहरिसालोक्यमश्नुते ७८ यःकुर्याद्दीपरचनांदेवताय
तनेनराः नतस्यपुण्यसंख्यातुमुत्सहेवक्त्रैरपि ७९ अखंडदीपंयःकुर्या
त्चिरप्रोर्वाशंकरस्यवा क्षणेक्षणेऽश्वमेधस्यफलंप्राप्नोत्यनुत्तमं ८० अ
र्चितंशंकरंदृष्ट्वाविष्णुंवापिनमेत्तुयः सविष्णुभवनंप्राप्यविष्णुनासहमो
दते ८१ प्रदक्षिणात्रकुर्यात्योविष्णोर्मनुजेश्वर पदेपदेऽश्वमेधस्यफ

लंप्राप्नोतिभूमिप ८२ द्विजंप्रदक्षिणीकृत्यप्रणामंकुरुतेतुयः समवेत्तू
तत्फलोवेसत्यंभूपालमद्वचः ८३ कांचीमाहेश्वरंलिंगंपूजितंनमितं
स्तुतं नतस्यविघ्नतेकत्सांसंस्तुतिर्वैवजायते ८४ शिवंप्रदक्षिणंकुर्यात्
सव्यासव्यविधानतः यत्फलंसमवाप्नोतितन्मेनिगदितःशृणु ८५ राज
न्प्रदक्षिणेकेनमुच्यतेब्रह्महत्यया शिवप्रदक्षिणेमर्त्यःसोमसूत्रंनलं
घयेत् ८६ स्तुत्वास्तोत्रैर्जगन्नाथंनारायणमनामयं सर्वान्कामानवा
प्नोतिमनसायद्यदिच्छति ८७ देवतायतनेयस्तुभक्तियुक्तःप्रनृत्यतिगी
तानिगायन्स्तपवात्तत्फलंशृणुभूपते ८८ गंधर्वराजतांगानेनृत्यात्तारुद्रणे
शतंप्राप्नोतिसत्कुलैर्युक्तःआकल्पंमोक्षभक्तितः ८९ मुखवाद्यकृतोये
तुदेवतायतनेनराः विमानशतसंयुक्ताकल्पंस्वर्गेनिवासिनः ९० कर

शब्दंचकुर्वंतिदेवतायतनेतुये तेसर्वेपापनिर्मुक्ताविमानेशायुगद्वयं ९
१ देवतायतनेयेतुघंटानादंप्रकुर्वते। तेषांपुण्यंनिगदितुकःसमर्थोस्तिपंडि
तः ९२ भेरीमृदंगपटहमरुजेष्वसडिंडिमैः संतर्प्यदेवदेवेशंलभं
तेयत्फलंशृणु ९३ देवस्त्रीशतसंयुक्ताःसर्वकामैःसुसंयुताः स्वर्गलो
कमनुप्राप्यमोदंतेकल्पपंचकं ९४ देवतायतनेकुर्वनराजन्सस्वरं
नरः सर्वपापविनिर्मुक्तोब्रह्मणासहमोदते ९५ तालादिकांस्यनिन
दंकुर्वनविष्णुगृहेनरः सर्वपापविनिर्मुक्तोविमानन्तसंकुलः ९६ गी
यमानश्चगंधर्वैर्विष्णुनासहमोदते एवमाद्यामहाधर्माःशतशोथसह
स्रशः ९७ उक्ताःकियंतोराजेंद्रकस्मान्नवर्णितुंक्षमः योदेवःसर्व
भुग्विष्णुर्ज्ञानरूपीनिरंजनः ९८ सर्वधर्मफलंराजन्नसंपूर्णप्रदद्दा

नारदी॰ ति च । यस्य स्मरणमात्रेण देवस्य चक्रिणः सफलानि भवंत्येव सर्वक
र्माणि भूपते १९ परमात्मा जगन्नाथः पुण्यकर्मफलप्रदः सत्कर्मके
६० र्नभिर्नित्यं स्मृतः सर्वार्त्तिनाशनः २० तमुद्दिश्य कृतं यच्च तदनंतायक
ल्पते नात्र चित्रं महाराज विष्णुः सर्वप्रदो यतः २१ धर्म्माणि विसफला
नि विष्णुः कर्माणि विष्णुश्च स एव भोक्ता कार्यं च विष्णुः करणानि विष्णुस्त
स्मान्न किंचिद्व्यतिरिक्तमस्ति २२ इति श्रीबृहन्नारदीये त्रयोद
शोऽध्यायः कउवाच पापभेदान्प्रवक्ष्यामि यथा स्थूलाश्च यात
नाः शृणुष्व धैर्यमास्थाय घोरा ह्यानरका यतः १ पापिनो ये दुरात्मानो पुरा॰
नरकाग्निषु संततं पच्यंते ये च्छृ तानवक्ष्योमयं करफलप्रदान २ त ६०
पनो वालुका कुंभो महारौरवरौरवौ ३ कुंभीपाको निरुच्छ्वासो कालसू

त्रः प्रमर्द्दनः ३ असिपत्रवनं घोरं लालाभक्षो हि मोहकरः मूषावस्था व
सकूपस्तथा वैतरणी नदी ४ तथा शोणितकूपश्च घोरः शोणितभोजनाः
स्वमांसभोजनं चैव वह्निज्वालानिवेशनं ५ शिलावृष्टिः शस्त्रवृष्टि
वह्निवृष्टिस्तथैव च क्षारोदकं चोष्णतोयं तप्तायःपिंडभक्षणं ६ अ
धःशिरःशोषणं च मरुस्थतपनं तथा तथा पाषाणवर्षश्च कृमिभोजन
मेव च ७ क्षारांबुपानं भ्रमणं तथा क्रकचदारणं पुरीषलेपनं चैव पुरी
षस्य च भोजनं ८ रेतःपानं महाघोरं सर्वसंधिषु दाहनं धूमपानं पा
शबंधनानाशूलानुरोपणं ९ अंगारशयनं चैव तथा मुसलमर्द्दनं
बहूनि काष्ठयंत्राणि कर्षणं छेदनं तथा १० पतनोत्पतनं चैव गदादंडा
दिपीडनं गजदंतप्रहरणं नानासर्पैश्च दंशनं ११ क्षारांबुसेचनं चै

नारदी: वा नासायां च मुखे तथा घोरं क्षाराम्बुपानं च तप्तलवणभक्षणं १२ स्ना
८१ युच्छेदं स्नायुबंधमस्थिच्छेदं तथैव च क्षारांबुपूर्णरंध्राणां प्रवेशं मांसभोज
नं १३ पित्तपानं महाघोरं तथैव श्लेष्मभोजनं वृक्षाग्रात्पातनं चैव जलो
तर्मज्जनं तथा १४ पाषाणधारणं चैव शयनं कंटकोपरि पिपीलिकादंश
नं वृश्चिकैश्चापि पीडनं १५ व्याघ्रपीडा शिवापीडा तथा महिषपीडनं क
र्दमे शयनं चैव दुर्गंधपरिपूरणं १६ वङ्कुशास्त्रशयनं महातिक्तनिषे
वणं अत्युष्णतैलपानं च महाकटुनिषेवणं १७ कषायोदकपानं च
तप्तपाषाणभक्षणं। अत्युष्णशीतस्नानं च तथा दशनशीर्णनं १८ ता पुरा:
पः शयनं चैव तप्तशीतांबुसेचनं सूचीप्रक्षेपणं चैव नेत्रयोर्नखसंधिषु ८१
१९ शिश्नेषु घृष्टघर्षणं चैव अयोभारस्य बंधनं। एवमाद्या महाभागया

तिनाकोटिकोटिशः २० अपि वर्षसहस्रेण नाहं निगदितुं क्षमः २१ एते
षु यस्य यस्यास्ति पापिनः क्षितिरक्षक तत्सर्वं संप्रवक्ष्यामि तन्मो निगदतः शृ
णु २२ ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः महापातकिनस्त्वेते तत्संस
र्गी च पंचमः २३ पंक्तिभेदी वृथापाकी नित्यं ब्राह्मणदूषकः। आदेशी वेद
विक्रेता पंचैते ब्रह्मघातकाः २४ ब्राह्मणः समाहूय दास्यामीति धनादि
कं पश्चान्नास्तीति यो ब्रूयात्तमाहुर्ब्रह्मघातकं २५ गवां तृष्णाभिभूता
नां जलार्थमभिधावतां अंतरायी भवेद्यस्तु तमाहुर्ब्रह्मघातकं २६ स्नाना
र्थं भोजनार्थं वा गच्छतो ब्राह्मणस्य यः समायात्यंतरायत्वे तमाहुर्ब्रह्मघात
कं २७ अनधीत्य च शास्त्राणि शास्त्रार्थं वक्ति योऽधमः अहंकाररतो
यश्च तमाहुर्ब्रह्मघातकं २८ प्रायश्चित्तं चिकित्सां च ज्योतिषं धर्मनिर्णयं

नारदीः विनाशार्थं ब्राह्मणं यो ब्रूयात्तमाहुर्ब्रह्मघातकं २९ परनिंदासु निरतः स्वात्मो
८२ त्कर्षरतश्च यः ओसत्यनिरतश्चैव ब्रह्महा परिकीर्त्तितः ३० अन्योद्वेग
तश्चैव तथा वान्यस्य सूचकः दंभाचाररतश्चैव ब्रह्महेत्यभिधीयते ३१
नित्यं प्रतिग्रहरतस्तथा प्राणिवधेरताः अधर्मस्यानुमंता च ब्रह्महा परि
कीर्त्तितः ३२ ब्रह्महत्यासमं पापमेवं बहुविधं नृप। सुरापानसमं पापं वक्ष्या
मि समासतः ३३ गणान्नभोजनं चैव गणिकानां निषेवणं पतितान्नाद
नं चैव सुरापानसमं स्मृतं ३४ उपासनपरित्यागो देवलानां च भोजनं सु
रायया विप्रसंयोगं सुरापानसमं स्मृतं ३५ यः शूद्रेण समाहूतो भोजनं कुरु पुं.रु:
ते द्विजः सुरापी स हि विज्ञेयः सर्वधर्मबहिःकृतः ३६ एवं शूद्रेण अनुज्ञातः ८२
कुर्याद्वै भोजनं द्विजः सुरापी स हि विज्ञेयः सर्वधर्मबहिःकृतः ग्रामि

स्यकर्मसोम्लोक ३७ एवं बहुविधं पापं सुरापानसमं स्मृतं हेमस्तेयसमं पा
पं वक्ष्यामि समासतः ३८ कंदमूलफलानां च कस्तूरी पट्टवाससां सदास्ते
यं च रत्नानां स्वर्णस्तेयसमं नृपः ३९ क्रमुकस्यापहरणं पयसां चंदनस्य च
। कर्पूरस्यापि हरणं हेमस्तेयसमं स्मृतं ॥ ४० ॥ ताम्रायस्त्रपुकांस्यानामाज्य
स्य मधुनस्तथा स्तेयं सुगंधद्रव्याणां हेमस्तेयसमं स्मृतं ४१ पित्रयज्ञ
परित्यागी धर्मकार्यविलोपकृत यतिनिंदापरश्चैव हेमस्तेयसमं स्मृतः ४२
रसद्रव्यापहरणं धान्यानां हरणं तथा रुद्राक्षहरणं चैव स्वर्णस्तेयसमं
स्मृतं ४३ भगिनीगमनं गुरुतल्पसमं स्मृतं ४४ हीनजात्यादिगमनं
मद्यपस्त्रीनिषेवणं परस्त्रीगमनं चैव गुरुतल्पसमं स्मृतं ४५ भ्रा
तृस्त्रीगमनं चैव वयस्यस्त्रीनिषेवणं विश्वस्तगमनं चैव गुरुतल्पसं

नारदी मंस्मृतं ४६ अकालेकर्मकरणंपुंश्चलीगमनमेवच । पितृयज्ञपरित्यागी
९३ धर्मकर्मविलोपकः । शास्त्रनिंदापरश्चैवविश्वेष्वगुरुतल्पगः ४७ इत्येव
मादयोराजन्महापातकसंज्ञिताः । एतेषामन्यतमेनापिसंगच्छेत्तुसमो
भवेत् ४८ यथाकथंचित्पापानामेतेषांपरमर्षिभिः शास्त्रेषुनिःकृतिर्दृष्टा
प्रायश्चित्तादिकल्पनैः ४९ प्रायश्चित्तविहीनानिपापानिशृणुभूपते
। समस्तपापतुल्यानिमहानरकदानिवै ५० ब्रह्महत्यादिपापानांकथंचि
न्निःकृतिर्भवेत् ब्राह्मणद्विट्प्रियस्तस्यनिःकृतिर्नापिकुत्रचित ५१ विश्वा
सघातकानांचकृतघ्नानांनरेश्वर । शूद्रस्त्रीसंगिनांचैवन्निःकृतिर्नास्तिकु पुरां:
त्रचितपरे शूद्रान्नपुष्टदेहानांवेदनिंदारतात्मनां गुरुनिंदापराणां ९३
चनिःकृतिर्नैवविद्यते ५३ शिवनिंदापराणांचविष्णुनिंदारतात्मनां । सत्क

पानिंदकानांचनेहामुत्रचनिःकृतिः ५४ बौद्धालयंविशेद्यस्तुमहापद्यपि
वैद्विजः नतस्यनिःकृतिर्दृष्टाप्रायश्चित्तशतैरपि ५५ बौद्धाःपाषंडिनःप्रो
क्ताःयतोवेदविनिंदकाः तस्माद्द्विजस्तान्नोक्षेतयोवेदबहिःकृताः ५६ ज्ञा
नतोऽज्ञानतोपिद्विजोबौद्धालयंविशेत् । ज्ञात्वाचेन्निःकृतिर्नास्तिशास्त्राणा
मर्षनिर्णयः ५७ एतेषांपापबहुल्यात्तनरकंकोटिकल्पसु ऐतेपाषंडिन
प्रोक्तास्तस्मादेषांननिःकृतिः ५८ प्रायश्चित्तविहीनानिप्रोक्तान्यानित्ततः
प्रभो अंहांसितेषांनरकाननुगदतोमेनिशामय ५९ महापातकिन
स्तासुप्रत्येकंयुगवासिनः तदंतेपृथिवीमेत्यसप्तजन्मसुगर्दभाः ६०
ततःश्वानोविदूराहाःभवेयुर्दशजन्मसु आशताद्वविट्कृमयःसर्पा
द्वदशजन्मसु ६१ ततःसहस्रजन्मानिमृगाद्याःपशवोनृप शताद्वंस्था

नारदीः चंडालजन्मततोगोधाशरीरिणः ६२ ततस्तुसप्तजन्मानिचांडालाःपरि
६४ कीर्तिताः ततःषोडशजन्मानिशूद्रोधान्यहीनजातयः ६३ ततस्तुजन्म
द्वितयेवैश्यःक्षत्रियएवच। तत्राप्यतिबलैर्नित्यंबाध्यमानोपिजीवति ६४
ततश्चविप्रतांप्राप्यदरिद्रोव्याधिपीडितः प्रतिग्रहपरोनित्यंततोनरक
मश्नुते ६५ असूयाविष्टमनसांरौरवंनरकंस्मृतं तत्रकल्पद्वयंस्थित्वा
चंडालाःशतजन्मसु ६६ माददस्वेतियोब्रूयात्गव्याग्नौब्राह्मणेषुच ।
श्वानयोनिशतंगत्वाचांडालेष्वपिजायते ६७ ततोविष्टाकृमिश्चैवततो
व्याघ्रस्त्रिजन्मसु तदंतेनरकंयातियुगानामेकविंशति ६८ परनिंदा पुराः
परायेचयेचनिष्ठुरभाषिणः दानानांविघ्नकर्तारस्तेषांपापफलंशृणु ६४
६९ तप्तायःपिंडवदनाःशूचीपूरितलोचनाः अधःशिरोऊर्ध्वपादाश्च

तासंतेयमकिंकरैः ७० एवंशताब्दपर्यंतंतदंतेशोणितह्रदे मग्नाःकंठरू।
पादपाणःशताब्दंनिवसंतिते ७१ ततःसर्वेषुघोरेषुनरकेषुशतंसमाः
स्थित्वाकर्मविशेषेणभवंत्यामिषभोजिनः ७२ परद्रव्यापहर्तॄणांनरकं
शृणुयद्धित मुशलोलूखलाभ्यांतुचूर्ण्यंतेतस्कराभृशं ७३ तदंतेतप्त
पाषाणग्रहणंवत्सरत्रयं ततश्चकालसूत्रेणछिद्यंतेसप्तवत्सरान ७४ ।
शोचंतःस्वानिकर्माणिपरद्रव्यापहारकं तत्रक्रमेणपच्यंतेनरकाग्निषु
संततं ७५ परस्वसूचकानांचनरकंशृणुभूपते यावद्युगसहस्रंतुतप्त
तायःपिंडभक्षणं ७६ सपाधंतचरशनाःसंदंशैरतिदारुणैः निरुच्छ्वा
सेमहाघोरेकल्पार्द्धंनिवसंतिते ७७ परस्त्रीलोलुपानांचनरकंशृणुभूप
ते तप्तताम्रस्त्रियस्तेनसुरूपाभरणैर्युताः यादृशीस्तादृशीस्तेश्वरमे

नारदी॰ तेषसभंबहु ७८ रमंतेतेनसंगच्छविद्रावंतंप्रगच्छताः नोदंतस्तत्कृतं
९५ कर्मतदंतेनरकानक्रमात् ७९ अन्यंभजंतेभूपालयनितस्त्रीकाचयास्त्रि
यः तासांचनरकानेवक्ष्येवदतोमेनिशामय ८० तप्तायःपुरुषास्तास्तु
तप्तायःशयनेबहु गृह्णीचाकल्पपर्यंतंरमंतेतिबलान्विताः ८१ ततस्ता
योषितोमुक्त्वाद्रुतासनसमोज्वलं अयस्तंभंसमाश्लिष्यातिष्ठंत्यब्दस
हस्रकं ८२ ततःक्षारोदकस्नानंक्षारोदकनिषेवणं तदंतेनरकान्सर्वान्
क्रमेणपरिभुंजते ८३ योहंतिब्राह्मणंगांचक्षत्रियंचनृपोत्तम सएवयो
तनाःसर्वाभुंक्तेकल्पेणयंचसु ८४ यःशृणोतिमहन्निंदांसादरंतच्छृ पु॰रा॰
णुष्वमे तेषांकर्णेषुपाघंतेतप्तायःकीलसंचयाः ८५ ततश्चतेषुछिद्रेषु ९५
तैलमत्यंतसमुष्णंच पूर्यतेचततश्चायिकुंभीपाकंप्रपद्यते ८६ नान्

स्तिकानांप्रवक्ष्यामिविमुःखानांहरेहरौ अह्नानांकोटिपर्यंतंलवणंभुंज
तेहिते ८७ ततश्चकल्पपर्यंतंपुरीषंभुंजतेनृप युगंतुरौरवेपश्चात्तप्त
तसैकतभोजनः ८८ ब्राह्मणान्येनिरीक्षंतेकोपदृष्ट्यानराधमाः त
तसूचीसहस्रेणतेषांचक्षुःप्रपूर्यते ८९ ततःक्षारांबुधाराभिःसिच्यं
तेनृपसत्तम ततश्चक्रकचैर्घोरैर्भिद्यंतेपापकर्मिणः ९० विश्वासघा
तिनांचैवमर्यादाघातिनांतथा परान्नलोलुपानांचनरकंशृणुदारुणं ९
१ स्वमांसभोजिनोनित्यंभक्ष्यमाणाःश्वभिस्तथा नरकेषुसमस्तेषु
प्रत्येकंप्रहृवासिनः ९२ प्रतिग्रहरतायेचनक्षत्रपाठकाः येचदेवलका
न्नानांभोजिनस्तान्शृणुष्वमे ९३ राजनाकल्पपर्यंतंयातनास्वासुदुः
खिताः यत्नंतेसततंपापाविषयाभोगरताःसदा ९४ ततश्चपुवमासा

नारदी॰ चंडाला॰ शतजन्मसु भवंति बहुदुःखार्त्ता दरिद्रव्याधिपीडिताः ९५
९६ असत्यनिरतानांचतथानिष्ठुरभाषिणां ज्वालायंतेलतप्तायांजिह्वाः संदंशै
र्विकृन्तनं ९६ ततस्तैलेनधूम्रेर्यैनेकालसूत्रप्रपीडिताः ततःक्षा-
रोदकस्नानंभूत्रविष्ठाजिषेवणं ९७ तदंतेभुवमासाद्यभवंतिम्लेछ-
जातयः अन्योदिगरतायेडुयांतिवैतरणीनदी ९८ त्यक्त्वापंचमहायज्ञा
लालाभक्षंव्रजंतिहि उपासनपरित्यागीरौरवंनरकंव्रजेत ९९ विप्रा
ग्रामकरादानंकुर्वतांशृणुभूपते यातनास्वासुपच्यंतेयावदाचंद्रतार
कं १०० विप्रग्रामेषुभूपालयः ऊर्ध्वादिधिकंकरं ससहस्रकुलोत्तं पुं॰रा॰
तैःकेनरकंकल्पयंचसु १०१ विप्रसम्हृद्ग्रमकराहानेयोनुमंताति ९६
पापकृत सएवकृतवानराजनब्रह्महत्यायुतंतदा कालसूत्रेम-

स्यघोरेवसंतिहिचतुर्युगं २ अयोनौचवियोनौचपशुयोनौचयोनरः रेत-
स्कारेतोमहापापीरेतोभोजनमाप्नुयात ३ वसाकूपंततःप्राप्यास्थिचाहि-
त्याद्सप्तकंरेतोभोजीभवेन्मर्त्यः सर्वलोकेषुनिंदितः ४ उपवासदिनेरा
जन्दंतधावमकृन्नरः साघोरंनरकंयातिव्याघ्रभक्षंचतुर्युगं ५ यःस्वक
र्मपरित्यागीपाखंडीत्युच्यतेबुधैः तत्संगकृत्तत्समःस्यात्तावुभावपिपा-
पिनौ ६ कल्पकोटिसहस्राणिनरकेवासमस्नुते स्त्रीशूद्राणांसमीपेतुवे
दाध्ययनंकृतद्विजः ७ कल्पकोटिसहस्रेषुप्राप्नोतिनरकान्नकेमात् देव
द्रव्यापहर्त्तारोगुरुद्रव्यापहारकाः ८ ब्रह्मघ्नाप्नोतिनर तिकामिनोमद्यपी
पिचमिथ्यापवादिनः तेषांमुखेजलैकास्तुपूर्यंतेयत्नगोयमाः ब्रह्महत्या
व्रतसमंदुःकृतंभुंजतेनृप अनाथधनहर्त्तारोपिनाथयेद्विषंतिच ९

नारदी: तेषां पापफलं वक्ष्ये शृणुष्व सुसमाहितः अधःशिरा ऊर्ध्वपादाश्च कीलिताः
८७ स्तंभकद्वये १० धूमपाना रतानि संति हत्वा ब्रह्मवध्परं जले देवालये वा
पियोः सृजेद्देहजं मलं ११ भ्रूणहत्यासमं पापं संप्राप्नोत्यति दारुणं हृता
स्ति के स्नान रवरान् यो सृजेद्देवतालये १२ जलेवा भुक्तशेषं च तस्य पा
पफलं शृणु भद्रप्रोताह्वलैर्भिन्ना आर्ता रावविरावविणः १३ अल्प
दर्पं तैलयानं च कुंभीपाकं ततः क्रमात् ब्रह्मा चंद्ररतेयस्तु कर्षं वोका
हमेव च १४ स याति नरकं घोरं यावदाचंद्रतारकं ब्रह्मस्व हरणं राजन्
हामुत्रातिदुःखदं १५ इह संपद्विपद्धि नाशाय परस्वनेकारकायच कू पुरा:
टसाक्ष्यं वदेद्यस्तु तस्य पापकं फलं शृणु स याति यातनाः सर्वा यावदिंद्रा ८७
श्चतुर्दश १६ इह पुत्राश्च योत्राश्च विनश्यंति परत्र च रौरवं नरकं

पतिः यः साक्ष्यमनृतं वदेत् १७ ये चातिकामिनो मर्त्याः ये च मिथ्यापवादिनः
तेषां मुखे जलौकास्तु पूर्यते यन्त्रगोयमाः १८ एवं बहि समाः स्थित्वा ततः
क्षारांबुसेचन स्वमांसाहारनिरता विशंति क्षारकर्दमं १९ ततो गजैर्नि
पातं तेमहत्व्रयतनं यथा तदंते भुव मासाद्य हीनांगाः प्रभवंति च २० कू
तो नाभिगमे यस्तु स्त्रियं मनुजेश्वर स याति रौरवं घोरं ब्रह्महत्यां च विं
दति २१ अनाचाररतं दृष्ट्वा यः शक्तो न निवारयेत् तत्पापार्द्धमवाप्नो
ति यतोपेक्षायराणी(?) २२ पापिनां पापगणनं यः करोति नराधमः अस्ति
त्वे तुल्यपापी स्यात् मिथ्या चेद्विगुणं भवेत् २३ अपापेपातकं यस्तु समारो
प्य विनिंदति स याति नरकान् घोरान् यावदाचंद्रतारकं २४ पापिनां निय
मानानां पापार्द्धं नश्यति क्षणात् यस्तु व्रतानि संगृह्य असमाप्य परित्यजेत्

नारदी २५ सोसिपत्रवनंप्राप्यद्रीनांगोजायतेभुवि अन्यैःसंगृह्यमाणानांव्रतानां
६६ विघ्नकृन्नरः २६ अतीवदुःखदंरौद्रंसयातिश्लेष्मभोजनं न्यायेचधर्म
शिक्षायांपक्षपातंकरोतियः नतस्यनिःकृतिर्भूयप्रायश्चित्तायुतैरपि
२७ अभोज्यभोजीसंप्राप्यपितृपानंसमायुतं चंडालयोनौसंजातोगोमां
साशीभवेत्सदा २८ अवमान्यद्विजान्वाग्भिर्ब्रह्महत्यांचविंदतिसर्वाश्च
यातनाभुक्त्वाचांडालोदृश्यजन्मसु २९ विप्रायदीयमानेतुयोविघ्नंकुरु
तेनरः ब्रह्महत्यासमंतेनकर्तव्यंव्रतमेवच ३० अपहृत्यपरस्वार्थंयः
परेभ्यःप्रयच्छति सदातानरकंयातियस्यार्थस्तस्यतत्फलं ३१ प्रतिश्रु पुरा:
त्याप्रदानेनलाभंक्षंव्रजेन्नरः पतिनिंदापरोराजनशिलायंत्रंव्रजे ६६
न्नरः ३२ आरामच्छेदिनोयांतियुगानामेकविंशति श्वभोजनंततोया

तिकमात्सर्वाश्चयातनं ३३ देवतारहृभेतारस्तकानांवभेदिनः पुष्पाराम
भिदश्चैवयांतिप्राप्नुयुःशृणु ३४ यातनास्तासुसर्वासुपच्यंतेवैपृथक्
पृथक ततश्चविण्मयःकल्पविंशतिरेवच ३५ ततश्चभुवमासद्य
चांडालत्वंसमाप्नुयुः ग्रामनाशकराणांचपापंतुसुमहत्तरं ३६ नसमर्थो
निगदितुंजन्मकोटिशतैरपि।उच्छिष्टभोजिनोयेचमिष्टान्नहृयराश्चयोर
तेषांयातनास्तीव्रायवदाचंद्रतारक ३७ उच्छिन्नपितृदेवेज्यावेदमा
र्गबहिःकृताः पाषंडाइतिविख्यातायातनाबह्वःस्मृताः ३८ एवं
बहुविधाप्रोक्ताःपातकाच्चोपपातकात्।तेषांतुसंख्याबहुत्वात्तकिंचिं
तास्तप्रकीर्तिताः ३९ पापानांपातनानांचधर्माणांचैवभूपते।सं
ख्यानिगदितुंलोकेकःक्षमोविभुनागते॥४०॥एतेषांसर्वपापानांधर्म

नारदी:	शास्त्रविधानतः प्रायश्चित्तेष्वचीर्णेषु पापराशिः प्रणश्यति ४१ प्राय-
८९	श्चित्तानि कार्याणि समपि कर्म जायते न्यूनातिरिक्ततानस्यात् सफलानि
भवंति च ४२ गंगा च तुलसी चैव सत्संगो हरिकीर्त्तनं अनूयाधहिंसा च स
र्वे पापप्रणाशिनः ४३ विष्णुर्पितानि कर्माणि सफलानि भवंति हि अन-
र्पितानि कर्माणि भस्मनि न्यस्तहव्यवत् ४४ नित्यं नैमित्तिकं काम्यं यच्चा
न्यन्मोक्षसाधनं विष्णोः समर्पितं सर्वं सात्विकं भवेत् ४५ हरिभक्तिः
परा नृणां सर्वपापप्रणाशनी भक्तिर्दशविधा ज्ञेया पापारण्यदवो-
पमा ४६ तामसै राजसैश्चैव सात्विकैश्च नृपोत्तम यश्चान्यस्य विनाशा	पुरा:
र्थं भजते श्रद्धया हरि ४७ खलवत्पृथिवीपाल सा भक्तिस्तामसीमा यो-	८९
र्चयेत्कैतवधिया स्वैरिणी स्वपतिं यथा नारायणं जगन्नाथं सा वै ताम

समध्यमा ४८ देवपूजापरान् दृष्ट्वा मत्सराद्योर्चयेद्धरि श्रृणु पृथिवी-
पाल सा भक्तिस्तामसोत्तमा ४९ धनधान्यादिकं यस्तु प्रार्थयन्नर्चयेद्-
द्धरिं। श्रद्धया परया विप्र: सा भक्ती राजसाधमा: ५० यः सर्वलोकविख्या
तां कीर्त्तिमुद्दिश्य माधवं। अर्चयेत्परया भक्त्या सा वै राजसमध्यमा
५१ सालोक्यादिपदं यस्तु समुद्दिश्यार्चयेद्धरिं। विज्ञेया पृथिवीपाल सा-
भक्ती राजसोत्तमा ५२ यस्तु स्वकृतपापानां क्षयार्थं पूजयेद्धरिं॥ श्रद्ध-
या परया राजन्नमा भक्तिः सात्विकाधमा ५३ हरेरिदं प्रियमिति शुश्रूषां
कुरुते तु यः अनेन श्रद्धया युक्तो ज्ञेया सात्विकमध्यमा ५४ विधिबुद्ध्यार्चयेद्य-
स्तु दासवच्चक्रपाणिनं॥ भक्तानां प्रवरा ज्ञेया सा भक्तिः सात्विकोत्तमा ५५
महिमानं हरेर्यस्तु किंचिच्छ्रुत्वापि यो नरः। तन्मयत्वेन संतुष्टः सा भक्तिः-

नारदी॰ श्योत्तमोत्तम ५६ अहमेव परो विष्णुर्मयि सर्वमिदं जगत॥ इति यास ततं
९० विघादुत्तमोत्तम ५७ एवं दृष्टा विष्णुभक्तिः संसारछेदकारिणी तत्रापि साचि
की भक्तिः सर्वकामफलप्रदा ५८ तस्माछृणुष्व भूपाल संसारछेदमिछ
ता। स्वकर्मणाविरोधेन भक्तिः कार्या जनार्द्दने ५९ यः स्वधर्मं परित्यज्य
भक्तिमात्रेण जीवति॥ न तस्य तुष्यते विष्णुराचारात्पूज्यते यतः ६० सर्वा
गमानामाचरः प्रथमः परिकल्प्यते॥ आचार प्रभवो धर्मो धर्मस्य प्रभुर
च्युतः ६१ तस्मात्कार्या हरौ भक्तिः स्वधर्मस्याविरोधिनी सदाचारविही
नानां धर्मो प्यसुखप्रदः ६२ त्वया महीश यत्पृष्टं तत्सर्वं गदितं मया त पुरा॰
स्माद्धर्मपरो भूत्वा सुखी भव दृढव्रत ६३ पूजयस्व प्रयत्नेन नारायण ९०
मनामयं यस्मिन्संपूज्यमाने तु सर्वान्कामानवाप्स्यसि ६४ पूजयं

स्वहरं विष्णुं चैकबुद्ध्या महीपते भेदकृत पुरुषो दुःखी इह लोके परत्र च ६५
शिव एव हरिः साक्षात हरिरेव शिवः स्वयं तयोरंतरकृद्याति नरको
नकोटिशः ६६ आत्मघातकपापाभ्यां राजंस्त्वत्पितामहाः वसं
ति नरके ते च दग्धाः कपिलकोपतः ६७ तानुद्धर महाभाग गंगाजलनि
षेचनैः गंगा सर्वाणि पापानि नाशयत्येव पंडित ६८ केशं वास्थि नरखा
दं वाप्यस्य वापि जनेश्वर गंगायाः स्पर्शमात्रेण तं नयंत्यच्युतं पदं ६९
यस्यास्थि भस्म वा राजन गंगायां क्षिप्यते नरैः महापातकयुक्तोपि स या
ति परमं पदं ७० गुह्यं शृणुष्व राजेंद्र गंगापायप्रणाशनी यद्बिंदुसेवना
देव नरकाणां त्रयं व्रजेत ७१ यानि कानि च पापानि प्रोक्तानि तव भूपते
।तानि पापानि नृपति गंगाबिंदुनिषेकतः ७२ नारद उवाच इत्यु

पृथिपालं धर्मराजो मुनीश्वरः । अंतर्दधे सराजापितपुस्त्तमनोरथे ७३
निक्षिप्य पृथिवीं सर्वां सचिवेषु महामतिः तपस्तप्तुं मुनिश्रेष्ठ हिमाद्रिं जगा
म सः ७४ इति श्रीबृहन्नारदीये चतुर्दशोध्यायः १४ ऋषय ऊवा
च हिमवद्गिरिमासाद्य किंचकार महीपतिः कथं वा हृतवान् गंगां सू
त तद्वक्तुमर्हसि १ सूत उवाच भगीरथो महाभागः जटाचीरधरो
वने गच्छन् हिमाद्रिं तपसे मध्ये गोदावरीतटं ॥२॥ तत्रापश्यन् महारण्ये भृ
गोराश्रममुत्तमं कृष्णसारसमाकीर्णं नानागच्छयसेवितं ३ भ्रमद्भ्रमरसं
युक्तं कलहंसगसंकुलं व्रजद्वराहनिकरं चमरीबालवीजितं ४ नृत्य
न्मयूरनिकरं सारंगसमयोचितं प्रवर्द्धितमहावृक्षं मुनिकन्याभिरादृ
त ५ शालतालतमालाढ्यं नृतं हितालमंडितं मालतीयूथिकाकुं

दचंपकाश्वत्थभूषितं ६ उत्फुल्लकुसमोपेतं ऋषिसंघनिषेवितं वेदशास्त्रमहाघोषमा
श्रमं प्राविशन्नृपो ७ गत्वांतं परमं ब्रह्म हृतं शिष्यगतैर्मुनिं तेजसा सूर्यसदृशं भृ
गुं तत्र ददर्श सः ८ ननाम विधिवद्भूपस्तस्मै मुनिवराय सः आतिथ्यं च गुरुस्त
स्मै चक्रे सन्मानपूर्वकं ९ कृतातिथ्यक्रियो राजा भृगुणा परमर्षिणा उवा
च प्रांजलिर्भूत्वा विनयान्मुनिपुंगवं १० राजा उवाच भगवान् सर्वधर्मज्ञ
सर्वशास्त्रविशारद भगवान् तुष्यते यस्य संसारार्णवतारकः ११ कर्मणा पू
ज्यते येन भगवान् भक्तभावनः अनुग्राह्योस्मि ते ब्रह्मन् सर्वमाख्यातुमर्हसि
१२ भृगुरुवाच राजंस्तवेप्सितं ज्ञातं च हि पुण्यवतां वरः अन्यथा स्व
कुलं सर्वकल्पमुद्धर्तुमर्हसि १३ यो वा को वापि भूपाल गंगां सेवाद्विजैः स्वकं
उद्धर्तुकामस्तं विद्यान्नररूपधरं हरिं १४ कर्मणा येन देवेशो नृणामिष्टफलं

नारदीः प्र॰ तत्प्रवक्ष्यामि राजेंद्र श्रृणुष्व सुसमाहितः १५ भवसत्यपरो राजन्नऽ
९२ हिंसानिरतस्तथा सर्वभूतहितो नित्यं मावदस्वानृतं क्वचित् १६ त्यज दुर्ज
नसंसर्गं भज साधुसमागमं कुरु पुण्यमहोरात्रं स्मर विष्णुं सनातनं १७ कु
रु पूजां महाविष्णोर्याहि शांतिमनुत्तमां द्वादशार्णाक्षरं वापि जप श्रेयो भ
विष्यति १८ राजोवाच सत्यं तु कीदृशं प्रोक्तमहिंसा चापि कीदृशी सर्व
भूतहितत्वं च प्रोक्तं कीदृग्विधं मुने १९ अनृतं कीदृशं प्रोक्तं दुर्जनाश्चा
पि कीदृशाः साधवः कीदृशाः प्रोक्तास्तथा पुण्यं च कीदृशं २० स्मर्तव्यश्च क
थं विष्णुस्तस्य पूजा च कीदृशी शांतिर्नाम च का प्रोक्ता किं महार्णाक्षरं तथा एतत्कं २१ पुरां:
सर्वशास्त्रार्थतत्त्वज्ञ मुने तत्त्वार्थकोविद मतन्मे पुत्रवात्सल्यात्सर्वमाख्या ९२
तुमर्हसि २२ श्रीगुरुवाच साधु साधु महाप्राज्ञ तव बुद्धिरनुत्तमा य

त्पृष्टोहं त्वया राजंस्तत्सर्वं प्रवदामि ते २३ यथार्थकथनं राजन्सत्यमाहुर्विपश्चि
तः धर्माविरोधितो वाच्यं तद्धि धर्मपरायणैः २४ देशकालादिविज्ञानात्स्व
धर्मस्याविरोधतः यद्वचः प्रोच्यते सद्भिस्तत्सत्यमभिधीयते २५ सर्वेषामेव
जंतूनामक्लेशजननं हि यत् राजन्नहिंसा वृत्तिर्या सर्वकामार्थदायिनी २६
धर्मकार्ये सहायत्वमकार्ये परिपंथिता सर्वलोकहितत्वं वै प्रोच्यते धर्मकोविदैः
॥२७॥ इच्छानुवृत्तिकथनं धर्माधर्मविवेकतः अनृतं तद्धि विज्ञेयं सर्वश्रेयोवि
रोधकं २८ ये लोकद्वेषिणो मूर्खाः कुमार्गरतबुद्धयः ते राजन्दुर्जना ज्ञे
याः सर्वधर्मबहिःकृताः २९ धर्माधर्मविवेकेन वेदमार्गानुसारिणः सर्व
लोकहितासक्ताः साधवः परिकीर्तिताः ३० हरिभक्तिकरं यत्तु सद्भिश्च परिरंजितं
आत्मनः प्रीतिजनकं तत्पुण्यं परिकीर्तितं ३१ सर्वं जगदिदं विष्णुर्विष्णुः सर्वस्य

कारणं अहंचविष्णुरितियतद्विष्णोःस्मरणंविदुः ३२ सर्वदेवमयंविष्णुंविधिवद्येत
स्यपूजनं इतियाभवतिप्रीतिःसाभक्तिःपरिकीर्त्तिता ३३ सर्वभूतमयोविष्
ष्णुःपरिपूर्णःसनातनः इत्यभेदप्रदाबुद्धिःसापूजापरिकीर्त्तिता ३४ समभा
वश्चमित्रेषुवर्जिवंचतथानृप यदृच्छालाभसंतुष्टिःशांतिर्नाम्नाप्रकीर्त्तिता ३५
एतेसर्वेसमाख्यातास्तपःसिद्धिप्रदायकाः समस्तपापराशीनांतरसानाशहेत
वः ३६ अष्टाक्षरंमहामंत्रंसर्वपापप्रनाशनं वक्ष्यामितवराजेंद्रपुरुषार्थे
कसाधनं ३७ विष्णोःप्रियकरंमंत्रंसर्वसिद्धिप्रदायकं नमोनारायणाये
तिजपेत्प्रणवपूर्वकं ३८ शंखचक्रधरंशांतंनारायणमनामयं लक्ष्मीसंश्रि
तवामांकंतथाभयकरंप्रभुं ३९ किरीटकुंडलधरंनानामंडनशोभितं भ्राज
त्कौस्तुभमालाढ्यंश्रीवत्सांकितवक्षसं ४० पीतांबरधरंदेवंसुरानमस्कृतं ध्या

येदनादिनिधनंसर्वकामफलप्रदं ४१ एवंभूतंमहाविष्णुपश्येदात्मानमात्मनि
॥सयातिसर्वश्रेयांसिविश्वासंकुरुभूपते ४२ वाच्योनारायणःप्रोक्तोमं
त्रस्तद्वाचकःस्मृतः वाच्यवाचकसंबंधोनित्यएवमहात्मनः ४३ यथानादिप्र
वृत्तोऽयंघोरःसंसारसागरः तथानादिर्महाविष्णुःसंसारान्मोचकःपरः ४४
सएवधाताजगतांसर्वकामफलप्रदः अंतर्यामीज्ञानरूपीपरिपूर्णःसना
तनः ४५ इत्येतत्सर्वमाख्यातंयन्मांत्वंपरिपृच्छसि स्वस्तितेस्तुतपःसिद्धि
र्लेगच्छयथासुखं ४६ सूतउवाच एवमुक्तोमहीपालोभगुणापरमर्षि
णा परमप्रीतिमापन्नःप्रपेदेतपसेवनं ४७ हिमवद्गिरिमासाद्यपुण्यदेशे
मनोहरे नादेश्वरेमहाक्षेत्रेतपस्तेपेतिदुश्चरं ४८ राजात्रिषवणस्नायी
कंदमूलफलाशनः कृतातिथ्यर्हणश्चापिनित्यंहोमपरायणः ४९ सर्व

वृहनार॰ भूतहितःशांतोनारायणपरायणः पत्रैःपुष्पैःफलैस्तोयैस्त्रिकालंहरिपूजकः
९४ ५० एवंबहुतिथंकालंनीत्वाघत्यंतधैर्यवान् ध्यायन्नारायणंदेवंशीर्णे
पर्णाशनोभवत् ५१ प्राणायामपरोभूत्वाराजापरमधार्मिकः निरुछ्वासपरोभू
त्वातपस्तेपुप्रचक्रमे ५१ ध्यायन्नारायणंदेवमनंतमपराजितं षष्टिवर्ष
सहस्राणिनिरुछ्वासपरोभवत् ५२ तस्यनासापुटात्तात्स्नोधूमोजज्ञेभयं
करः तंदृष्ट्वादेवतानांचत्रासोजज्ञेमहामुने ५३ स्वाधिकारक्षयभया
त्तदेवाःसंत्राससपीडिताः अभिजग्मुर्महाविष्णुंयत्रास्तेजगतांपतिः ५४
क्षीरोदस्योत्तरंतीरंसंप्राप्यत्रिदशेश्वराः अस्तुवन्देवदेवेशंपशुपाशा पुंसः
विमोचकं ५५ देवाऊचुः नताःस्मविष्णुंजगदेकनाथंस्मरत्समस्ता ९४
र्त्तिहरंपरेशं स्वभावशुद्धंपरिपूर्णभावंवदंतियंज्ञानतनुंचतज्ज्ञाः ५६

ध्येयःसदायोगिजनैर्महात्मास्वेच्छाशरीरैःकृतदेवकार्यः जगत्स्वरूपोजग
दादिनाथस्तस्मैनमामःपुरुषोत्तमाय ५७ यन्नामसंकीर्त्तनतोमुरारेः
समस्तपापंप्रशमंप्रयाति तमीशमाद्यंपुरुषंपुराणंनताःस्मविष्णुंपुरुषा
र्थसिद्ध्यै ५८ यत्तेजसाभांतिदिवाकराद्यानातिक्रमंत्यस्यजिनदीनदीश्च का
लात्मकंतंत्रिदशाधिनाथंनताःस्मदेवंपुरुषाख्यरूपं ५९ जगत्करोत्यब्जभ
वेधजस्त्वंपुनंतिलोकानमृतयमश्चविप्राः तमादिदेवगुणयन्त्रिधानंयपद
ज्ञयातंप्रणताःस्मविष्णु ६० वरंवरेण्यंमधुकैटभादिसुरासुराभ्यर्चितपाद
पद्मं सद्भक्तसंकल्पितसिद्धिहेतुंज्ञानैकवंद्यंप्रणताःस्मदेवं ६१ अनादिम
ध्यांतमजंपरेशंमभेद्यमभेद्यमज्ञानतिरोहितंतं सच्चित्सनानंदनंतस्वरू
पंरूपादिहीनंप्रणताःस्मदेवं ६२ नारायणंविष्णुमनंतमीशंपीतांबरं

नारदी: पद्मभुवासुसेव्यं पद्मप्रियंशंकरंविष्णुद्वंनतास्मवैसर्वोत्तममभिष्टःहृतं ६
९५ ३ इतिस्तुतोमहाविष्णुर्देवैरिंद्रादिभिस्तदा चरितंतस्यराजर्षेर्देवानां।
संप्रवेदयेत ६४ हरिःसुरानसमाश्वास्यतेषांदत्वाभयंद्विजः तपश्च
इतिराजर्षिर्यत्रतंदेशमोययौ ६५ शंखचक्रधरोदेवःसच्चिदानंदविग्रहः
प्रत्यक्षतामगात्तस्यराज्ञःसर्वजगद्गुरुः ६६ ददर्शराड्ढरिराजाभाभासि
तदिगंतरं अतसीपुष्पसंकाशंस्फुरत्कुंडलमंडितं ६७ विकसत्पद्म
पत्राक्षंविभ्राजन्मुकुटोज्वलं श्रीवत्सकौस्तुभधरंपीतांबरधरंप्रभुं
६८ दीर्घबाहुमुदारांगंसुरार्चितपदांबुजं पश्यन्नानामनृपालोदंडवत्क्षि पुरां:
तिमंडले ६९ अत्यंतहर्षसंपूर्णःसरोमांचःसगद्गदः कृष्णकृष्णेति ९५
कृष्णेतिकृष्णोत्याहपुनःपुनः ७० तस्यविष्णुःप्रसन्नात्मात्वंतर्यामी।

जगद्गुरुः उवाचकृपयाविष्णोभगवानभूतभावनः ७१ श्रीभगवानु
र्भगीरथमहाभागतवाभीष्टंभविष्यति आगमिष्यंतिमल्लोकंतवपूर्वपिता
महाः ७२ ममभूर्त्यंतरंशंभुंयजस्तोत्रैश्वशक्तितः सतेसमस्तश्रेयां
सिविधास्यतिनसंशयः ७३ अहमप्यद्विजानाम्यंयजामिप्रसहंनृप
तस्मादाराधयेशानंस्तोत्रैःस्तुत्यंसुखप्रदं ७४ अनादिनिधनोदेवःसर्वका
मफलप्रदः त्वयासंपूजितोराजन्तवश्रेयोविधास्यति ७५ इत्युक्त्वादेवदेवे
शोजगतांपतिरच्युतः अंतर्दधेसविश्वात्मातत्रस्थोसौसोपिभूपतिः ७६
किमिदंस्वप्नःप्राहोस्वित्सत्यंवेतिद्विजोत्तमाः चिंताकुलोभूद्राजेंद्रःकिंरो
मीतिविस्मितः ७७ अथांतरिक्षेवागुच्चैःप्राहसंभ्रांतचेतसं सत्यमेत
दितिव्यक्तंनचिंतांकर्तुमर्हसि ७८ ततोन्मनाःक्षितिपतिरीशानंलोक

नारदी: कारणं समस्तदेवानारूपमस्तोषीद्भक्तितत्परः ७९ राजउवाच प्रण
९६ मामिजगन्नाथंप्रणतार्त्तिप्रणाशनं प्रमाणागोचरंदेवमीशानंप्रणवात्मकं
८० जगद्रूपमयंनित्यंसर्गस्थित्यंतकारकं ऊर्द्धरेतंविरूपाक्षंविश्वरूपं
नतोस्मितं ८१ आदिमध्यांतरहितमनंतमजमव्ययं यमामनंतियोगी
द्रास्तंवंदेपुष्टिवर्द्धन ८२ नमोलोकाधिनाथायवंचतेपरिवंचते नमोस्तु
नीलकंठायपशूनांपतयेनमः ८३ नमश्वेतस्वरूपायपुष्टानांपतयेनमः
नमोकल्मषनाशायभूतानांपतयेनमः ८४ नमःपिनाकहस्ताय
शूलहस्तायतेनमः नमोस्तिसर्वाशूपायखट्वांगहस्तयतेनमः ८५ मनमः
पंचास्यदेवयक्षेत्राणांपतयेनमः नमःकपालहस्तायपात्रमुद्गरधारि पुरां:
णे ८६ नमःसमस्तभूतानामादिभूतायतेनमः नमोगुणाधिदेवा ९६

यनिर्गुणायपरात्मने ८७ नमोगुणाधिदेवायगणानांपतयेनमः नमोहिर
ण्यगर्भायहिरण्यपतयेनमः ८८ हिरण्यरेतसेतुभ्यंविश्वरूपायवेनमः
नमोध्यानस्वरूपायनमस्तेध्यानसाक्षिणे ८९ नमस्तेध्यानसंस्थायध्यान
गम्यायतेनमः येनेदंविश्वमखिलंचराचरविराजित ९० प्रधानंपुरुष
श्चैवअभाद्दृष्टिर्विजानि स्वप्रकाशंमहात्मानंपरंज्योतिःसनातनं ९१
यमामनंतितत्त्वज्ञाःसवितारंनचक्षुषं उमाकांतविरूपाक्षनीलकंठसदाशि
व ९२ मस्कंजयपयमहादेवयद्भूतंतत्वआश्रुत्व कपर्दिनेनमस्तुभ्यंनील
ग्रीवायतेनमः कृशानुरेतसेतुभ्यंशिवोनःसुमनाभव ९३ यतःसमु
द्राःसरितोरयश्चगंधर्वयक्षासुरसिद्धसंघाः यतश्चचेष्टांकुरुतेहिजंतुः
संनोदेवःश्रुतयाविशंतु ९४ ध्यायंतियंयोगिजनाविशुद्धसर्वांतरात्मा

नारदीः नमरूपमीशं स्वतंत्रमेकंगुणवद्धानंनमामिभूयः प्रणमामिभूय ९५ यइ
९१ दंशंकरस्तोत्रंसागरेणप्रभाषितं सर्वाकामानवाप्नोतित्रिसंध्यासुपन्नरः ९
६ इतिस्तुतोमहादेवःशंकरोलोकशंकरः आविर्बभूवभूपस्यसंतप्ततपस
स्तदा ९७ पंचवक्त्रंदशभुजंचंद्रार्द्धकृतशेखरं त्रिलोचनंमुहारंगनागयज्ञो
पवीतिनं ९८ विशालवक्षसंदेवंदशनकुंमहेश्वरं गजचर्मांबरधरंसु
रार्चितपदांबुजं ९९ ददृणसगरुदोराजादंमवक्षितिमंडले नमामो
वैर्महादेवमहादेवेतिकीर्तयन् १०० विज्ञायभक्तिंभूपस्यशंकरःशशिशे
खरः राजानंप्राहतुष्टोस्मिवरयेतिवरंतदा १ पूजितोस्मिचपासम्यकस्तो पुराः
त्रेणतपसातथा भुंक्ष्वभोगानखिलान्ततोमोक्षमवाप्स्यसि १०२ ९१
इत्युक्तोदेवदेवेनराजासंतुष्टमानसः उवाचप्रांजलिर्भूत्वाजगतामीश्वरे

श्वरं ३ राजोवाच अनुग्राह्योस्मियदितेवरदान्महेश्वर त्रिमार्गगाप्रद
नेनउद्धरास्मत्पितामहान् ४ श्रीमहादेवउवाच इत्थमयावैगंगातेतेषां
चैवगतिःपरा ततोमोक्षंपरेदत्तमित्युक्त्वांतर्दधेशिवः ५ कपर्द्दिमुकुट
भ्रस्तागंगालोकैकपावना पावयंतीजगत्सर्वमन्वगच्छद्भगीरथं ६ ततः
प्रभृतिसादेवीनिर्मलामलहारिणी भागीरथीतिविख्यातासर्वलोकेषुवि
श्रुता ७ सगरस्यात्मजाःपूर्वंयत्रदग्धामुनीश्वराः तंदेशंप्लावयामास
गंगासर्वसरिद्वरा ८ यदासप्लावितंभस्मसागराणांतुगंगया तदैवनर
केमग्नाःसागरास्तेगतैनसः ९ पुरासंक्रुद्धरूपमानेनयमेनपरिरक्षिताः
तदेवपूजितास्तेनगंगाजलपरिप्लुताः १० गतपापान्सविज्ञाययमः
सगरसंभवान् प्रणम्यार्घ्यंचविधिवत्इत्याहभगवान्यमः ११ यमउवा

नारदीः चः भोभोराजसुतायूयंनरकात्भृशदारुणात् एतावंतंतुसमयंभुक्त्वं
९६ तःस्वकर्मभिः १२ धर्मस्वद्न्वयेजातोभगीरथइतिश्रुतः तेनास्मात्तारिता
यूयंनरकाद्भृशदारुणात् १३ आरुह्यास्तुविमानानिसर्वकामान्वितानिच
गच्छध्वंविष्णुभवनंसर्वलोकोत्तमोत्तमं १४ इत्युक्तास्तेमहात्मानोयमेन
गतकल्मषाः शतकोटिकुलैर्युक्ताविष्णुलोकंप्रपेदिरे १५ एवंप्रभावासा
गंगाविष्णुपादाग्रसंभवा सर्वलोकेषुविख्यातामहापातकनाशनी १६
यइदंपुण्यमाख्यानंमहापातकनाशनं पठेच्चशृणुयाद्वापिगंगास्नानफ
लंलभेत् १७ यस्त्वेतत्पुण्यमाख्यानंप्रवदेद्ब्राह्मणाग्रतः सयातिविष्णु पुराः
भवनंपुनरावृत्तिवर्जितं १८ इतिश्रीवृहन्नारदीयेपंचदशोऽध्यायः ९६
१५ सूतउवाचः व्रतानिसंप्रवक्ष्यामिशृणुध्वंमुनिसत्तमः प्रसीद

तिहरिर्येस्तुपशुपाशविमोचकः १ अनायासेनसर्वेषांप्रसीदतिजनार्दनः इष्ट
नंतसुखंचैवतपोवृद्धिश्चजायते २ येनकेनाप्युपायेनहरिपूजापरायणाः
प्रयांतिपरमंस्थानमितिप्राहुर्मनीषिणः ३ मार्गशीर्षसितेपक्षेद्वादश्यांजल
शायिनं उपोषितोर्चयेत्सम्यक्नरःश्रद्धासमान्वितः ४ स्नातःशुक्लांबर
धरोदंतधावनपूर्वकं गंधपुष्पाक्षतैःसम्यक्अर्चयेद्वाग्यतोहरिं ५
केशवायनमस्तुभ्यमितिविष्णुंचपूजयेत् जुहुयादष्टोत्तरशतंमनेनैवतिला
हुतीः ६ रात्रौजागरणंकुर्यात्शालिग्रामसमीपतः स्नापयेदुग्धपयसा
नारायणमनामयं ७ गीतैर्वाद्यैश्चनैवेद्यैभक्ष्यैर्भोज्यैश्चकेशवं त्रिकालं
पूजयेद्भक्त्यामहालक्ष्म्यासमन्वितं ८ पुनःकल्येसमुत्थायकृत्वाकर्मयथो
चितं पूर्ववत्पूजयेद्देवंवाग्यतोनियतःशुचिः ९ पायसंघृतसंमिश्रंनालि
केरफलान्वितं मंत्रेणानेनविप्रायदद्यात्सदक्षिणं १० केशिवःकेहि

हृदेवः सर्वसंपत्प्रदायकः परमान्नप्रदानेन मम स्यादिष्टदायकः ११ ब्रा-
ह्मणान् भोजयेत्पश्चात् शक्तितो बंधुभिः सह नारायणपरो भूत्वा स्वयं भुंजीत
वाग्यतः १२ इति यः कुरुते भक्त्या केशवार्चनमुत्तमं स याति पौंडरीकस्य फलम
ष्टगुणं द्विजाः १३ पौषमासे सिते पक्षे द्वादश्यां समुपोषितः नमो नारायणेति पू
जयेत्प्रयतो हरिं १४ पयसा पूर्वमानेन नारायणमनामयं संस्नाप्य जागरं
कुर्यात्त्रिकालार्चनतत्परः १५ धूपदीपैश्च नैवेद्यैर्गंधैः पुष्पैर्मनोरमैः नृत्यै
श्च गीतवाद्यैश्च स्तोत्रैश्चाप्यर्चयेद्धरिं १६ कृशरान्नं च विप्राय दद्यात्सघृतद-
क्षिणं सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः १७ नारायणः प्रसन्नः
स्यात् कृशरान्नप्रदानतः मंत्रेणानेन विप्राय दद्याद्वै दानमुत्तमं १८ द्विजां
श्च भोजयेच्छक्त्या स्वयमद्यात्सबांधवः य एवं पूजयेद्भक्त्या देवं नारायणं प्र
भुं १९ अग्निष्टोमाष्टकमासिकफलं संपूर्णमवाप्नुयात् माघस्य शु

क्लद्वादश्यां पूर्ववत्समुपोषितः २० नमस्ते माधवायेति हुत्वाष्टौ च घृताहुतीः
पूर्वमानेन पयसा स्नापयेत माधवं तदा पुष्पादिभिर्महात्मानमर्चयेत्प्रय
तो नरः २१ रात्रौ जागरणं कुर्यात्पूर्ववद्भक्तितत्परः कालकर्म च निर्वर्त्य मा
धवं पुनरर्चयेत् २२ प्रस्थं तिलानां विप्राय दद्याद्धेमं च प्रचकं सदक्षिणं सवा
स्त्रं च सर्वपापविमुक्तये २३ माधवः सर्वभूतात्मा सर्वकर्मफलप्रदः तिल
दानेन महता सर्वान् कामान् प्रयच्छ मे २४ मंत्रेणानेन विप्राय दद्याद्भक्ति
समन्वितः ब्राह्मणान् भोजयेच्छक्त्या संस्मरन्माधवं प्रभुं २५ एवं यः कु
रुते भक्त्या तिलदानव्रतं द्विज स संपूर्णमवाप्नोति वाजपेयशतं फलं २६
फाल्गुनस्य सिते पक्षे द्वादश्यां समुपोषितः गोविंदाय नमस्तुभ्यमिति संपूज
येद्धुतौ २७ अष्टोत्तरशतं कुर्याद्घृतसंमिश्रितं तिलं पूर्वमानेन पयसा गो
विंदं स्नापयेच्छुचिः २८ रात्रौ जागरणं कुर्यात्त्रिकालं पूजयेत्तथा समाप्य

कल्पकर्माणिगोविंदं पूजयेत्पुनः २९ व्रीह्याढकंचविप्रायदद्यात्सवस्त्रंसदक्षिणं
नमोगोविंदसर्वेशगोपिकाजनवल्लभ ३० अनेनधान्यदानेनप्रीतोभवजगद्गु
रो एवंकृत्वाव्रतंसम्यक्सर्वपापविवर्जितः कोटिगोदानजंपुण्यंसंपूर्णंप्राप्नुया
न्नरः ३१ चैत्रमासेसितपक्षेद्वादश्यांसमुपोषितः नमोस्तुविष्णवेतुभ्यमिति
पूर्ववदर्चयेत् ३२ क्षीरेणस्नापयेद्विष्णुंपूर्वमानेनभक्तितः तथैवस्नापये
द्विप्रघृतप्रस्थेनसादरं ३३ कृत्वाजागरणंरात्रौअर्चयेत्पूर्ववद्व्रती ततःक
ल्येयमुत्थायथथाकर्मसमापयेत् ३४ अष्टोत्तरशतंकुर्यान्मधुमिश्रतिला
हुतीः सदक्षिणंचविप्रायदद्याद्राढकतंडुलं ३५ प्राणरूपीमहाविष्णुःप्राण
दःसर्ववल्लभः तंदुलस्यप्रदानेनप्रीयतांमेजनार्दनः ३६ एवंकृत्वानरो

भक्त्यासर्वपापविवर्जितः अत्यग्निष्टोमयज्ञस्यफलमष्टगुणंलभेत् ३७
छ वैशाखस्यशुक्लद्वादश्यामुपोष्यमधुसूदनं द्रोणक्षीरेणदेवेशंस्नापयेद्भक्ति

संयुतः ३८ जागरंतत्रकर्तव्यंत्रिलोकार्चनसंयुतं नमस्तेमधुहंत्रेतिजु
हुयाद्भक्तितोघृतं ३९ ततःप्रातःसमभ्यर्च्याविधिवन्मधुसूदनं सर्वपाप
विनिर्मुक्तोऽश्वमेधाष्टकंफलं ४० ज्येष्ठमासेसितेपक्षेद्वादश्यामुपवासकृ
त् क्षीरेणाढकमानेनस्नापयेत्त्रिविक्रमं ४१ नमस्त्रिविक्रमायेतिपू
जयेद्भक्तिसंयुतः जुहुयात्पायसेनैवअष्टोत्तरशताहुतीः ४२ कृत्वाजा
गरणंसम्यक्पुनःपूजांप्रकल्पयेत् अपूपविंशतिंदद्यात्ब्राह्मणायसद
क्षिणां ४३ देवदेवजगन्नाथप्रसीदपरमेश्वर उपायनंचसंगृह्यममा
भीष्टप्रदोभव ४४ ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीतवाग्यतः सर्व
पापविनिर्मुक्तोमहादानाष्टकंफलं ४५ छ॥आषाढशुक्लद्वादश्यामुप
वासीजितेंद्रियः वामनंपूर्वमानेनस्नापयेत्पयसाव्रती ४६ नमस्तेवा

नारदी: मनायेतिदूर्वाहोमंचशक्तितः कुर्याच्चजागरंसम्यक्वामनंचार्चयेत्पुनः ४
१०१ ७ सदक्षिणंचदध्यन्नंनालिकेरफलान्वितं दद्याद्दात्मविदेभक्त्यावामना
र्चनशीलिने ४८ वामनोबुद्धिदोदातावामनःसदा वामनस्ता
रकोभ्याभ्यांवामनायनमोनमः ४९ अनेनद्वादशान्नंशक्तितोभोजये
त्द्विजान् सप्राप्नोतिद्विजश्रेष्ठअग्निष्टोमशतंफलं ५० छ॥ श्रावण
स्यसितेपक्षेद्वादश्यामुपवासकृत् क्षीरेणमधुमिश्रेणश्रीधरंशक्तितो
यजेत् ५१ नमोस्तुश्रीधरायेतिगंधाद्यैःपूजयेत्क्रमात् जुहुयात्तद्घृत
दाज्येन्तनयथाशक्तिद्विजोत्तमाः जागरंनत्रकर्तव्यंपुनः पूजातथैवच॥ पुरा:
दातव्यंचैवविप्रायआढकीक्षीरमुत्तमं ५३ वस्त्रंचदक्षिणांचैवदातव्येहे १०१
मकुंडले मंत्रेणानेनविप्रेंद्राःसर्वकामार्थसिद्धये ५४ क्षीराब्धिशायि

नंदेवंपशुपाशविमोचकं क्षीरदानेनसुप्रीतोभवसर्वसुखप्रद ५५ अनेन
दत्वाविप्रांश्चभोजयेच्छक्तितोव्रती अश्वमेधसहस्रस्यफलमक्षयमश्नुते
५६ छ॥ मासिभाद्रपदेशुक्लेद्वादश्यांसमुपोषितः स्नापयेत्द्रोणपयसा
संहृषीकेशंजगद्गुरुं ५७ हृषीकेशनमस्तुभ्यमितिसंपूजयेन्नर वरूणा
मधुयुक्तेनजुहुयाच्छक्तितोव्रती ५८ जागराद्दीनिनिर्वर्त्यदद्याद्दात्मविदृतेः
अष्टकार्द्धंचगोधूमानदक्षिणांचस्वशक्तितः ५९ हृषीकेशनमस्तुभ्यं
सर्वलोकहेतवे ममसर्वसुखंदेहिगोधूमस्यप्रदानतः ६० ब्राह्मणान्भो
जयेच्छक्त्यास्वयंभुंजीतवाग्यतः ससर्वपापनिर्मुक्तोब्रह्ममेधफलंलभे
त् ६१ मासेचाश्वयुजेशुक्लेद्वादश्यांसमुपोषितः पद्मनाभंचपयसास्नापये
च्छक्तिमांछुचिः ६२ नमस्तेपद्मनाभेतिहोमंकुर्यात्स्वशक्तितः तिलव्रीहि

यवैश्चैवपूजांचविवत्तथा ६३ जागरंचैवनिर्वर्त्यपुनः पूजांप्रकल्पयेत्
द्याद्विजायकुर्ववंमधुविप्राः सदक्षिणं ६४ पद्मनाभनमस्तुभ्यंसर्वलो
कपितामह मधुदानेनसुप्रीतोभवसर्वसुखप्रद ६५ एवंयःकुरुतेभक्त्या
पद्मनाभस्यपूजनं अश्वमेधसहस्रस्यफलमाप्नोत्यनुत्तमं ६६ छ॥
कार्त्तिकेशुक्लद्वादश्यामुपवासीजितेंद्रिय क्षीरेणाढकमानेनदद्याच्चाज्ये
नतावता: ६७ नमोदामोदरायेतिस्नापयेद्भक्तिसंयुतः अष्टोत्तरशतं
कृत्वामद्दुम्रिश्चतिलाकृती:॥६८॥ जागरंनियतःकुर्यात्तत्रिकार्चनतत्परः प्रा
तःसंपूजयेद्देवंपद्मपुष्पैर्मनोरमैः ६९ पुनस्तिलेजुफलतांबूलसोमसौगं
धिमौषधं युतंचान्नंदद्याद्विप्रायभक्तितः ७० दामोदरजगन्नाथसर्व
कारणकारण त्राहिमांकृपयादेवशरणागतपालक ७१ अनेनदा

नंदचावैश्रोत्रियायकुटुंबिने दक्षिणांचयथाशक्त्याब्राह्मणांश्चापिभोजयेत्
७२ एवंकृत्वाव्रतंसम्यक्अश्नीयात्बंधुभिःसह अश्वमेधसहस्राणां
द्विगुणंफलमश्नुते ७३ एवंकुर्यान्नव्रतीयस्तुद्वादशीव्रतमुत्तमं संवत्सरं
मुनिश्रेष्ठययातिपरमंपदं ७४ एकमासेद्विमासेवायःकुर्याद्भक्तितत्परः
॥तत्तत्फलमवाप्नोतिप्रयातिपरमंपदं ७५ एवंसंवत्सरंकृत्वाकुर्यादुद्याप
नंव्रती मार्गशीर्षेसितेपक्षेद्वादश्यांचमुनीश्वरः ७६ स्नात्वाप्रातर्यथा
चारंदंतधावनपूर्वकं शुक्लमाल्यांबरधरःशुक्लगंधानुलेपनः ७७ मंड
पंकारयेद्दिव्यंचतुरस्रंसुशोभनं घंटाचामरसंयुक्तंकिंकिणीरवशोभि
तं ७८ अलंकृतंपुष्पमाल्यैर्वितानध्वजराजितं छादितंशुक्लवस्त्रेणदी
पमालाविभूषितं ७९ तन्मध्येसर्वतोभद्रंकुर्यात्सर्वमलंकृतं तस्योप

नारदीः रिम्यसेत्कुंभान्द्वादशांयपूरितान ८० एकेनशुक्लवस्त्रेणकेशाद्यैः शोधितेनचं
१०३ तान् कुंभांश्छादयेद्विप्राः पंचरत्नसमन्वितान् ८१ लक्ष्मीनारायणंदेवंकारयेद्भ
क्तिमानव्रती। हेम्नावारजतेनापितथाताम्रेणवाद्विजाः ८२ स्थापयेत्प्रतिमांतां
चकुंभोपरिसुसंयमी। तन्मूल्यंवाद्विजश्रेष्ठकांचनंवास्वशक्तितः ८३ सर्वव्रते
षुमतिमानवित्तशाठ्यंपरित्यजेत्। यदिकुर्याच्छाठ्यंयातितस्यायुर्न्नसंपदः ८४
अनंतशायिनंतैश्चौम्यंदेवंनारायणमनामयं। पंचामृतेनप्रथमंस्नापयेद्भक्तिसंयु
तः ८५ नामभिःकेशवाद्यैश्चउपचारंप्रकल्पयेत्। रात्रौजागरणंकुर्यात्पुराण
श्रवणादिभिः ८६ जितनिद्रोभवेत्सम्यक्उपवासीजितेंद्रियः। त्रिकालमर्चयेद्देवं पुःराः
यथाविभवविस्तरं ८७ ततःप्रातःसमुत्थायकृत्यंकर्मसमाप्यच। तिलहोमंव्या १३
हृतिभिःसहस्रंजुहुयाद्व्रती ८८ ततःसंपूजयेद्देवंगंधपुष्पादिभिःक्रमात्। देव

स्यपुरतःकुर्यात्पुराणपाठकंततः ८९ दद्यात्द्वादशविप्राणांदध्यन्नंपायसंतथा
। अपूपैर्दशभिर्युक्तंसघृतंचसदक्षिणं ९० देवदेवजगन्नाथभक्तानुग्रहविग्र
ह गृहाणेपायनंकुंभंसर्वाभीष्टप्रदोभव ९१ अनेनोपायनंदत्त्वाप्रार्थयेत्प्रांज
लिस्ततः आधायजानुनीभूमौविनयावनतोव्रती ९२ नमोनमस्तेसुरराजन
मोऽस्तुतेदेवजगन्निवास कुरुष्वसंपूर्णफलंममाद्यनमोस्तुतुभ्यंपुरुषोत्तमाय
९३ इतितंप्रार्थयेद्विद्वानदेवंचपुरुषोत्तमं दद्यादर्घंचदेवायजानुभ्यामवनिंगतः
९४ लक्ष्मीपतेनमस्तुभ्यंपयोदधिनिवासिने अर्घंगृहाणदेवेशश्रियाचसहि
तःप्रभो ९५ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतां
यातिसद्योवंदेतमच्युतं ९६ इतिविज्ञाप्यदेवस्यतत्सर्वंसंयमी। व्रते। प्रतिमांद
क्षिणायुक्ताचार्यायनिवेदयेत ९७ ब्राह्मणान्भोजयेत्पश्चात्शक्त्यादद्याच्चद

स्त्रिणां। भुंजीत वाग्यतः पश्चात्स्वयं बंधुजनैर्युतः ९९ आसायं शृणुयाद्विष्णु
कथां विद्वज्जनैस्तथा इत्येवं च नरो यस्तु कुर्याद्विद्वादशीव्रतं ९९ सर्वान्का
मानवाप्नोति परत्रामुत्र चोत्तमः त्रिःसप्तकुलसंयुक्तः सर्वपापविवर्जितः १००
प्रयाति विष्णुभवनं यत्र गत्वा न शोचति य इदं शृणुयान्नित्यं द्वादशीव्रतमुत्तमं
वाचयेद्वापि विप्रेंद्रो वाजपेयफलं लभेत १०१ इति श्रीबृहन्नारदीये षोडशो
ऽध्यायः १६ सूत उवाच अन्यद्व्रतवरं वक्ष्ये शृणु सुसमाहिताः सर्वहरं
पुण्यं सर्वदुःखनिवर्हणं १ ब्राह्मणक्षत्रियाविशां शूद्राणां योषितां तथा समस्तका
मफलदं सर्वव्रतफलप्रदं २ दुःस्वप्ननाशनं धर्म्यं दुष्टग्रहनिवारणं सर्वलोके
षु विख्यातं पौर्णिमाव्रतमुत्तमं ३ विधानं तस्य वक्ष्यामि शृणुध्वं गदतो मम
येन चीर्णेन पापानां कोटिः प्रशाम्यति ४ मार्गशीर्षे सिते पक्षे पूर्णायां नियतः

शुचिः स्नानं कुर्याद्यथाचारं दंतधावनपूर्वकं ५ शुक्लांबरः शुद्धो गृहमाग
त्य वाग्यतः प्रक्षाल्य पादावाचम्य स्मरन्नारायणं प्रभुं ६ नित्यं देवार्चनं कृ
त्वा पश्चात्संकल्पपूर्वकं लक्ष्मीनारायणं देवमर्चयेद्भक्तिभावितः ७ आ
वाहनासनार्घ्यैश्च गंधपुष्पादिभिर्व्रती नमो नारायणायेति पूजयेद्भक्ति
तत्परः ८ गीतैर्वाद्यैश्च नृत्यैश्च पुराणपठनादिभिः स्तोत्रैर्वाराधयेद्व्रत
कृत्वाग्रतः शुचिः ९ देवस्यतः कृत्वा स्थंडिलं चतुरस्रकं अरत्निमा
त्रं तत्राग्निं स्थापयेद्गृह्यमानतः १० आज्यभागांतपर्यंतं कृत्वा पुरुषसूक्तैः
सूक्तः चरुणा च तिलैश्चापि घृतेन जुहुयात्तथा ११ एकवारं द्विवारं वा त्रि
वारं वापि शक्तितः होमं कुर्यात्प्रयत्नेन सर्वपापनिवृत्तये १२ प्रायश्चित्ता
दिकं सर्वं स्वगृह्योक्तविधानतः समाप्य होमं विधिवत् शांतिसूक्तं जपेद्बुधः

नरदीः १३ पश्चाद्देवंसमागत्यपुनःपूजांप्रकल्पयेत तथोपवासंदेवायधर्पयेद्भ-
१०५ क्तिसंयुतः १४ पौर्णमास्यांनिराहारःस्थित्वातवाज्ञया भोक्ष्यामिपुंडरीका-
क्षपरेह्निशरणंभव १५ इतिविज्ञाप्यदेवायजलेर्घ्यंद्यात्प्रयेद्देवे जानुभ्या
मवनींगत्वाशुक्लपुष्पाक्षतान्वितं १६ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भ
व गृहाणार्घ्यमयादत्तंरोहिण्यासहितःप्रभो १७ एवमर्घ्यंप्रदायेंदोःप्रार्थयेत्प्रां
जलिस्ततः तिष्ठन्पूर्वामुखोभूत्वापठन्पनिदंचसत्तमाः १८ नमःशुक्लांश
वेतुभ्यंद्विजराजायतेनमः रोहिणीपतयेतुभ्यंलक्ष्मीभ्रात्रेनमोस्तुते १९
ततजागरणंकुर्यातपुराणश्रवणादिभिः जितेंद्रियोवशीशुद्धःपाषंडालोकव पुंरांः
र्जितः २० ततःप्रातःप्रबुद्धीनस्वाचारंयथाविधिः पुनःसंपूजयेद्देवयथाविभ १०५
वविस्तरं २१ ब्राह्मणानभोजयेत्तस्मात्शक्तितःप्रयतोनरः बंधुभृत्यादिभिः

सार्द्धंस्वयंभुंजीतवाग्यतेः २२ एवंपौषादिमासेषुपूर्णिमास्यामुपोषिती अ
र्च्येयेद्भक्तिसंयुक्तोनारायणमनामयं २३ एवंसंवत्सरंकृत्वाकार्त्तिक्यांपौ
मादिने उद्यापनंप्रकुर्वीततद्विधानंवदामिवः २४ सउपंकारयेद्दिव्यंचतु
रस्त्रंसुमंडलं शोभितंपुष्पमालाभिर्वितानध्वजराजितं २५ बहुदीपस-
माकीर्णंकिंकिणीरवशोभितं दर्पणैश्चामरैश्चैवकलशैश्वसमावृतं-
२६ तन्मध्येसर्वतोभद्रंपंचवर्णविराजितं कृत्वाजलान्वितंकुंभंन्यसेत्त
स्योपरिद्विजाः २७ पिधाकुंभवस्त्रेणशोधितेनातिशोभितं हेम्नावारजते
नापितथाताम्रेणवाद्विजाः २८ लक्ष्मीनारायणेदेवंकृत्वातस्योपरिन्यसेत्
पंचामृतेनसंस्नाप्यगंधपुष्पादिभिःक्रमात् २९ भक्ष्यभोज्यादिनैवेद्यैः
पूजयेत्संयतेंद्रियः जागरंचततः कुर्यात्सम्यक्श्रद्धासमन्वितः ३० ततः

प्रातश्चविधिवत्पूर्ववद्विष्णुमर्चयेत् आचार्यायततोदद्यात्प्रतिमांदक्षिणान्विता
३१ ब्राह्मणान्भोजयेच्छक्त्याविप्रवेसत्ववारितं तिलदानंप्रकुर्वीतयथाश
क्त्यासमाहितः ३२ कुर्यादग्नौचविधिवत्तिलहोमंचपूर्ववत् एवंकृत्वानरः
सम्यक्लक्ष्मीनारायणव्रतं ३३ इहभुक्त्वामहाभोगान्पुत्रपौत्रैःसमन्वि
तः सर्वपापविनिर्मुक्तःकुलायुतसमन्वितः ३४ प्रयातिविष्णुभवनंयो
गिनामपिदुर्लभं ३५ इतिश्रीबृहन्नारदीयेसप्तदशोऽध्यायः १७ ॥

सूतउवाच अन्यद्व्रतंप्रवक्ष्यामिध्वजारोपणसंज्ञितं सर्वपापहरं
पुण्यंविष्णुप्रीणनकारणं १ यःकुर्याद्विष्णुभवनेध्वजारोपणमुत्तमं स
पूज्यतेविरिंच्याद्यैःकिमन्यैर्बहुभाषितैः २ हेमभारसहस्रंतुयोददाति
कुटुंबिने तत्फलंतुल्यमात्रंस्यात्ध्वजारोपणकर्मिणः ३ ध्वजारोपणतु

ल्यंस्यात्देगंगास्नानमनुत्तमं अथवातुलसीसेवाशून्यालिंगप्रपूजनं
४ अहोपूर्वमहोपूर्वमहोपूर्वमिदंद्विजाः सर्वपापहरंकर्मध्वजारो
परोपणसंज्ञितं ५ यानिकार्याणिकर्माणिध्वजारोपणकर्मणि तानि
सर्वाणिवक्ष्यामिशृणुध्वंगदतोमम ६ कार्त्तिकस्यसितेपक्षेदशम्यां
प्रयतोनरः स्नानंकुर्यात्प्रयत्नेनदंतधावनपूर्वकं ७ एकाशीब्रह्म
चारीचस्वपेन्नारायणंस्मरन् धौतांबरधरःशुद्धःस्वपेन्नारायणाग्र
तः ८ ततःप्रातःसमुत्थायस्नात्वाचम्ययथाविधि नित्यकर्माणिनिर्व
र्त्यपश्चाद्विष्णुःसमर्चयेत् ९ चतुर्भिर्ब्राह्मणैःसार्द्धंकृत्वाचस्वस्तिवाच
कं नांदीश्राद्धंप्रकुर्वीतध्वजारोपणकर्मणि १० ध्वजस्तंभौचगायत्र्याप्रो
क्षयेद्वस्त्रसंयुतौ सूर्यवैनतेयंचहिमांशुंतत्रार्चयेत् ११ धातारंचवि

नारदी: धातारं पूजयेत्तत्र मकद्वये हरिद्राक्षतगंधाद्यैश्च पुष्पैर्विशेषतः १२
१०७ ततो गोचर्ममात्रं तु स्थंडिलं चोपलिप्य तु आधायाग्निं स्वगृह्योक्तमाघाराज्यभागा
दिकं क्रमात् १३ जुहुयात्पायसं चैव घृतमष्टोत्तरं शतं प्रथमं पौरुषं सू
क्तं विष्णोर्नुकमिरावती १४ ततश्च वैनतेयाय स्वाहेत्यष्टाहुतीस्तथा
सोमो धेनुसूक्तं च जुहुयाच्च ततो द्विजाः १५ सौरमंत्रेण जपेत्तत्र शांति
सूक्तानि शक्तितः रात्रौ जागरणं कुर्यात् उपकंठं हरेः शुचिः १६ ततः प्रा
तः प्रसमुत्थाय नित्यकर्म समापनं गंधपुष्पादिभिर्देवमभ्यर्चयेत्पूर्ववत्क्र
मात् १७ ततो मंगलवाद्यैश्च सूक्तपाठैश्च शोभनं नृत्यैश्च स्तोत्रपठने पुरा:
नयेद्विष्ण्वालयं ध्वजं १८ देवस्य द्वारदेशे वा शिखरे वा मुदान्वितः १०६
सुस्थिरं स्थापयेद्विप्रा ध्वजं सुस्तंभशोभितं १९ गंधपुष्पाक्षतैर्देवं धू

पदीपैर्मनोरमैः भक्ष्यभोज्यादिसंयुक्तैर्नैवेद्यैश्च हरिं यजेत २० एवं दे
वालये स्थाप्य शोभनं ध्वजमुत्तमं प्रदक्षिणमनुव्रज्य स्तोत्रमेतदुदीरये
त् २१ सूत उवाच नमस्ते पुंडरीकाक्ष नमस्ते विश्वभावन नमस्ते
हृषीकेश महापुरुषपूर्वज २२ येनेदमखिलं जातं यत्र सर्वं प्रतिष्ठितं
लयमेष्यति यत्रैतत्तं प्रपन्नोऽस्मि केशवं २३ न जानंति परं भावं यस्य ब्र
ह्मादयः सुराः योगिनो यं न पश्यंति तं वंदे ज्ञानरूपिणं २४ अंतरिक्षं तु
यन्नाभिर्द्यौर्मूर्धा यस्य चैव हि पादोऽभूद्यस्य पृथिवी तं वंदे विश्वरूपिणं ॥
२५ यस्य श्रोत्रे दिशः सर्वाः यच्चक्षुर्दिननायकौ ऋक्सामयजुषा येन तं
वंदे ब्रह्मरूपिणं २६ यन्मुखाद्ब्राह्मणा जाता यद्बाहोरभवन्नृपाः वैश्या
यस्योरुतो जाताः पद्भ्यां शूद्रोऽजायत २७ मायासंगममात्रेण वदंति पुरु

षंतुयं स्वभावविमलं शुद्धं निर्विकारं निरंजनं २८ क्षीराब्धिशायिनं देवम
नंतमपराजितं सद्भक्तवत्सलं विष्णुं भक्तिगम्यं नमाम्यहं २९ पृथिव्यादी
नि भूतानि तन्मात्राणींद्रियाणि च सूक्ष्मासूक्ष्माणि येनासन् तं वंदे सर्व
तोमुखं ३० यद्ब्रह्मपरमं धाम सर्वलोकोत्तमोत्तमं निर्गुणं परमं ब्रह्म
प्रणतोस्मि पुनः पुनः ३१ अविकारमजं शुद्धं सर्वतोबाहुमीश्वरं यमा
मनंति योगींद्राः सर्वकारणकारणं ३२ एको विष्णुर्महद्भूतं पृथग्भूतान्य
नेकशः त्रीन्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ३३ यो देवः स
र्वभूतानामंतरात्मा जगन्मयः निर्गुणः परमानंदः स मे विष्णुः प्रसीद

तु ३४ हृदयस्थोपि दूरस्थो मायामोहितात्मनां ज्ञानिनां सर्वगो यस्तु
स मे विष्णुः प्रसीदतु ३५ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च हूय

ते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ३६ ज्ञानिनां कर्मणां चैव तथा भ
क्तिमतां नृणां गतिदाता विश्वभुग्यः स मे विष्णुः प्रसीदतु ३७ जग
द्धितार्थं यो देहं ध्रियंते लीलया हरेः तानर्चयंति विबुधाः स मे विष्णुः
प्रसीदतु ३८ यमामनंति वै संतः सच्चिदानंदविग्रहं निर्गुणं च गु
णाधारं स मे विष्णुः प्रसीदतु ३९ परेशः परमानंदः परात्परतरः प्र
भुः चिद्रूपश्चापरिज्ञेयः स मे विष्णुः प्रसीदतु ४० य इदं कीर्तयेन्नि
त्यं स्तोत्राणामुत्तमोत्तमं सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥
४१ इति स्तुत्वा नमेद्विष्णुं ब्राह्मणांश्च प्रपूजयेत् आचार्यं पूजये
त्पश्चात् दक्षिणाच्छादनादिभिः ४२ ब्राह्मणान्भोजयेद्युक्तोग्र
क्तितो भक्तिरावतः पुत्रमित्रकलत्राद्यैर्बंधुभिः सह वाग्यतः ४३

ब्रहनीरदी० कुर्वीतपारणंविप्राःनारायणः यस्त्वेतत्कर्मकुर्वीत ध्वजारोपणमुत्त
१०९ मं ४४ तस्यपुण्यफलंवक्ष्येश्रृणुध्वंसुसमाहिता ४४ पटध्व
जस्यविप्रेंद्राः यावच्चलतिवायुन तावंतिपापजालानिनश्यंतेनेवसं
शयः ४५ महापातकयुक्तोवायुक्तोवासर्वपातकैः ध्वजंविष्णु
गृहेकृत्वासर्वपापैःप्रमुच्यते ४६ यावद्दिनानिवसतिध्वजंविष्णु
गृहेद्विजाः तावधुगसहस्त्राणिहरिसारूप्यमश्नुते ४७ आरोपि
तंध्वजंदृष्टायेऽभिनिंदंतिधार्मिकाः तेपिसद्योविमुच्यंतेह्युपपात
ककोटिभिः ४८ आरोपितंध्वजंविष्णुगृहेघुन्वनयंस्वकं क पूराण
र्तुःसर्वाणिपापानिधं धुन्वंतिनिमिषार्द्धतः ४९ श्रृणुध्वमृषयः १०९
पुण्यमितिहासंपुरातनं सर्वपापप्रशमनंनारदेनप्रभाषितं

५० आसीत्सुराकृतयुगेसुमतिर्नामभूपतिः सोमवंशोद्भवःश्रीमा
नसप्तद्वीपैकराटस्वयं ५१ धर्मात्मासत्यसंपन्नःशुचिर्वेदरूपोऽतिथि
प्रियः सर्वलक्षणसंपन्नसर्वसंपद्विभूषितः ५२ सदाहरिकथा
सेवीहरिपूजापरायणः हरिभक्तिपराणांचशुश्रुषनहंकृतिः
५३ पूज्येषुपूजानिरतःसमदर्शीगुणान्वितः सर्वभूतहितः
शांतःकृतज्ञःकीर्त्तिमानत्र्यः ५४ तस्यभार्यामहाभागासर्वल
क्षणसंयुता पतिव्रतापतिप्राणानान्मासत्यमतिस्तुसा ५५
तावुभौदंपतीनित्यंहरिपूजापरायणौ जातिस्मरौसहाभागौस
त्यक्षौसत्यपरायणौ ५६ अन्नदानरतौनित्यंजलदानपरायणौ
तटाकारामवप्रादीनसंख्यातान्वितेनतु ५७ साउसत्यमति

बृहन्नारदी० र्नित्यंशुचिर्विष्णुगृहेसती। तत्पत्संतं संबुद्धामनोत्तामंपगुनुना
११० ह्निनी ५८ सोपिराजामहाभागोद्वादशीद्वादशीदिने ध्वजमारो
पयामासमनोत्पंबहुविस्तरं ५९ वएवंहरिपरंनित्संराजानंध
र्मकोविदं तस्यप्रियांसत्यमतिदेवाअपिसदास्तुवन् ६० त्रिलो
केविश्रुतोतोयइंपत्संतंधार्मिको आययौबहुभिःशिष्यैर्द्रष्टु
कामोविभांडकः ६१ विभांडकमुनिश्रेष्ठमायातंजनेश्वरः
प्रत्युद्ययौसपत्नीकः पूजाभिर्बहुविस्तरं ६२ कृतातिथ्यक्रियं
शांतंकृतासनपरिग्रहं नचासनगतोनृपःप्रांजलिर्मुनिमब्रव पुराण०
त ६३ राजाउवाच भगवानकृतार्थकृतोऽस्मिचदर्शनागमने ११०
नभो सतामागमनंसंतःप्रसंसंतिसुखावहं ६४ यत्रस्यान्म

हतांप्रेमतत्रस्युःसर्वसंपदः तेजःकीर्तिर्धनंविप्राहंतिप्राहुर्विपर
श्चितः ६५ तत्रहर्द्धिंगमिष्यंतिश्रेयांस्यनुदिनंमुने तत्रसंतःप्र
कुर्वंतिमहतींकरुणांप्रभोः ६६ योमूर्ध्निधारयद्बालनमहत्पा
दतलोदकं सस्नातःसर्वतीर्थेषुपुण्यात्मानात्रसंशयः ६७ म
मपुत्राश्चदाराश्चसंपत्त्वयिसमर्पिता ममाज्ञापयशांतात्मनत्र
ह्मन्किंकरवाणिते ६८ विनयावनतंभूयंतन्निरीक्ष्यमुनीश्व
रः स्पृशन्करेणराजानंप्रत्युवाचातिहर्षितः ६९ ऋषिरुवा
च राजन्यदुक्तंभवतातत्सर्वंचकुलोचितं विनयावनताः
सर्वेपरंश्रेयोलभंतिहि ७० धर्मश्चार्थश्चकामश्चमोक्षश्चनृप
सत्तम विनयाल्लभ्यतेसर्वंविनयात्किंनसाध्यते ७१ प्रीतोऽ

स्मितव भूपालसन्मार्ग्गपरिवर्त्तिनः स्वस्तितेऽस्तुमहाभागयत्पृष्टा
मितदुच्यतां ७२ अर्हणाबहवः संतिहरिसंतुष्टिकारकाः त्वम
त्राप्यद्यतोनित्यंध्वजारोपणकर्म्मणि ७३ तवनायां विसाधीय
नित्यंनत्यपरायण किमर्थमेतद्वृत्तांतंयथावद्वक्तुमर्हसि ७४
राजाउवाच शृणुध्वभगवनसर्वंयत्पृच्छसिमहामितत आश्च
र्यभूतंलोकानामावयोश्चरितंमुने ७५ अहमासंपुराशूद्रोमा
लिनिर्नामसत्तमः कुमार्ग्गनिरतोनित्यंसर्वलोकाहितेरतः
७६ पिशुनोधर्मविद्वेषीदेवद्रव्यापहारकः गोघ्नश्चब्रह्महा

चौरः सर्वप्राणिवधेरतः ७७ नित्यंनिष्ठुरवक्ताचपापीवेश्या
परायणः एवंस्थितः कंचित्कालमनादृत्यमहद्वचः ७८ सर्व

बंधुपरित्यक्तोदुःखीवनमुपागतः मृगमांसाशनोनित्यंतथामार्ग्गनि
रोधकृत ७९ एकाकीदुःखबहुलोह्यवसंनिर्ज्जनेवने एकदाक्षुत्प
रिश्रांतोनिद्राघार्त्तःपिपासितः ८० जीर्णंदेवालयंविप्रापश्यन्नृपन
विजनेवने हंसकारंडवाकीर्णंतत्समीपेमहत्सरः ८१ पर्यंतव
नपुष्पौघच्छादितंतन्मुनीश्वरः अपिबंतत्रपानीयंतीरेविगतश्रमः
८२ उन्मूल्यवृक्षमूलानिमयाक्षुद्विनिवारिता तस्मिन्जीर्णा
लयेविप्रानिवासंकृतवानहं ८३ जीर्णस्फुटितसंधानंतथाचा
हमकारिषं पर्णैस्तृणैश्चकाष्ठैश्चगृहंसम्यक्प्रकल्पितं ८४
भूमिर्मद्रोगवासत्याद्युपलिप्तामुनीश्वर तत्राहंव्याधवृत्तिस्थोहत्वा
बहुविधान्मृगान् ८५ अजीवंवर्त्तनंकृत्वावत्सराणांचविंशति

अपेयमागतासाध्वीविंध्यदेशसमुद्भवा ८६ निषादकुलसंभूता ना
म्नाकोकिलनीश्रुता बंधुवर्गपरित्यक्तादुःखिताजीर्णविग्रहा ८७
भ्रमन्तक्षुत्तृट्परिश्रांता शोचंतीस्वकृतक्रिया दैवयोगात्समायाता
भ्रमंतीविजनेवने ८८ मामेवाग्रीष्मतापार्त्ताहितस्तापप्रपीडिता
तृषांदुःखवतीदृष्ट्वाजातामेविपुलाघृणा ८९ मयादत्तंजलंचा
स्यैमांसंवन्यफलंतथा विगतश्रमासाहृष्टान्मयापृष्टायथातथं
९० न्यवेदयत्स्वकर्माणिशृणुष्वंचवरानने इयंकोकिलनीना
म्नानिषादकुलसंभवा ९१ दामुकस्यसुताविद्धिन्स्वसुद्धिमपर्व
ते परस्वहारिणीनित्यंसदापैशून्यवादिनी ९२ बंधुवर्गैःपरित्य
क्तायतोहतोहतवतीयाति कांतारेविजनेभ्रमनमत्समीपमुपाग

ता ९३ इत्येवंस्वकृतंकर्मसर्वमह्यंन्यवेदयत् तस्मिन्देवालयेविसो
रहंचेयंचवैमुने ९४ दंपतीभावमाश्रित्यस्थितोमांसाशनौतदा एक
दामद्यपानेनप्रमत्तौवैसुनिर्भरं ९५ तत्रदेवालयेरात्रौमुदितौमांस
भोजनात् बध्वानस्त्रंवदंडाग्रेप्रमत्तौमद्यवया ९६ अत्यंतहर्षसं
पन्नावावांसम्यगनृत्यतां तत्कालएवपंचत्वमावयोर्भवन्मुने ९७
आगतायमदूतास्त्वयाशहस्ताभयकराः कर्मणातेनतुष्टात्मा भग
वान्मधुसूदन ९८ स्वदूतान्प्रेषयामासमदाहरणकारणात्
संवादस्तुमहानासीदूतानांतसत्तमाः ९९ मयाश्रुतंचतंसर्वंजं
वंशृणुधर्मविदांवर दूतास्तेदेवदेवस्यशंखचक्रगदाधराः १००

सहस्रसूर्यसंकाशाः कांताः कोमलभाषिणः भयंकरान्पाशहस्ता-
न्दृष्ट्विणोयमकिंकरान् १०१ तानूचुर्देवदूतास्ते हरिनामपरायणाः
देवदूता ऊचुः भोभोः क्रूराचारा विवेकपरिवर्जिताः १०२ मुंचध्व
मेतौ निःपापौ दंपती हरिवल्लभौ विवेकस्त्रिषु लोकेषु सपद्मामादि
कारणं १०३ अपापे पापधीर्यस्तु तविंधात्तु रूपाधमं पापे च पाप
धीर्यस्तु तं विद्याद्धमाधमं १०४ यमदूता ऊचुः युधाजिः सत्यमेवो
क्तमेतौ पातकिसत्तमौ श्रेयावै पापिनो दंभास्तत्रेष्यामो वयं चिमौ १
०५ श्रुतिप्रणिहितो धर्म अधर्मस्त्वद्विपर्ययात् एतावद्धर्मचरितो
तन्नेष्यामो यमांतिकं १०६ ततश्च वाति कोपिता देवदूत महौजसः

प्रत्यूचुस्तान्यमभटानभासितदिगंतरः १०७ देवदूता० अहोक
ष्टं धर्मदृशामधर्मः स्पृशते महान् सम्यक्विवेकशून्यत्वं निदानं ध्रा
पदां महता १०८ शालिनाच्च विशेषेण नरकाध्यक्षतां गताः यूयं कि
मर्थमद्यापि कर्तुं पापानि सोद्यमाः १०९ स्वकर्मक्षय यत्नं महापात
किनोऽपि च तिष्ठंति नरके यूयं यावद्वाचंद्रतारकं ११० पूर्वसंचित
पापानां मदृष्टानि दिवः किमर्थं पापकर्माणि करिष्यथ पुनः पुनः
१११ श्रुतिप्रणिहितो धर्मः सत्यसत्यं न संशयः किंवाप्यांचरि
तान्धर्मान्प्रवक्ष्यामो यथातथं ११२ एतौ पापविनिर्मुक्तौ हरि
शुश्रूषणे रतौ हरिणाप्युच्चमानो च मुचध्वं मा विलंबयथ ११३ ए

पाचनर्त्तनंचक्रेतथाचैवोध्वजंभटः अंत्यकालेविष्णुगृहेतेनपापवि
मोचितो ११४ संक्रांतिकालेयन्नामश्रुतवंतोपिवैसकृत् लंभंतेपर
मंस्थानंकिमुश्रुश्रूषणेरताः ११५ महापातकयुक्तोवायुक्तोवास
र्वपातकैः ईक्षितोभगवद्भक्तैर्लभंतेपरमांगति ११६ यतीनांविष्णु
भक्तानांपरिचर्यापरायणैः ईक्षिताअपिगच्छंतिपापिनोऽपिपरांगति
११७ मुहूर्त्तंवामुहूर्त्तार्द्धंयास्तिष्ठेद्धरिमंदिरे सयातिपरमंस्थानंकि
मुशुश्रूषणेरता ११८ उपलेपनकर्त्तारोसंमार्जनपरायणा एतेह
रिगृहेनित्यंजीर्णसंधानकारिणो ११९ जलसेचनकर्त्तारोदीपदोह
रिसद्मिरे कंपमेतोमहाभागोनयिष्पथयमांतिकं १२० दूतकोदे

वदूतास्तेछिन्नापरांतदेवहि आरोप्यांवाविमानंतुययुविष्णोःपरंपदं १२
१ आवांसामीप्यमापन्नौदेवदेवस्यचक्रिणः भुक्तवंतोमहाभोगानयाव
द्वैकालंशृणुषमे १२२ युगकोटिसहस्राणियुगकोटिशतानिच उषि
त्वाविष्णुभवनेब्रह्मलोकंसमागतो १२३ तावत्कालंचतत्रापिस्थित्वैदृपं
दमापगतो तत्रापितावद्भोगंजुभुक्त्वादिव्यमनुत्तमं १२४ ततःपृथ्वी
गतोप्राप्तोक्रमेणमुनिसत्तमः अत्रासपदतुलाहरिपूजाप्रसादतः
१२५ अनिछयाकृतेनापिप्राप्तमेवंविधंमुने सम्यगाराध्यविश्वेशं
भक्तिभावेनमाधवं १२६ प्रस्यामीतिपरंश्रेयइतिमेनिश्चितामतिः अवशे
नापियत्कर्मकृतंतुसुमहत्फलं ददातिहिनृणांविप्रकिंपुनःसम्यगर्चनात्

एतत्सर्वंनिशम्यासौविभांडकमुनीश्वरः अग्निनेघमहीपालंप्रययौस्वंत
पोवनं सूतउवाच तस्माच्छृणुध्वंविप्रेंद्रादेवदेवस्यचक्रिणः परिचर्यात्
सर्वेषांकामधेनूपमास्मृता हरिपूजापराणांचहरिरवसनातनः ददाति
परमंश्रेयःसर्वकामफलप्रदं यइदंपुण्यमाख्यानंसर्वपापप्रणाशनं
वाचयेच्छृणुयाद्वापिध्वजारोपणपुण्यभाक् इतिश्रीबृहन्नारदीयेऽष्ट
दशोध्यायः १८ सूतउवाच अन्यद्व्रतंप्रवक्ष्यामिशृणुध्वंसुसमा
हिताः हरिपंचकविख्यातंसर्वलोकेषुदुर्लभं नारीणांचनराणांचसर्वदुः
खनिवारणं धर्मकामार्थमोक्षाख्यंपुरुषार्थैकसाधनंसर्वाभीष्टप्रदंचै
वव्रतफलप्रदं सर्वव्रतोत्तमंश्रेष्ठंसर्वकामफलप्रदं मार्गशीर्षेसितेपक्षे

दशम्यांनियतेंद्रियः कुर्यात्स्नानादिकंकर्मदंतधावनपूर्वकं कृत्वादे
वार्चनंसम्यक्तथापंचमहाध्वरान् । एकादश्यांभवेत्तस्मिन्दिनेनिगृही
तेंद्रियः ततःप्रातःसमुत्थायएकादश्यांमुनीश्वराः स्नानंकृत्वायथाचारं
हरिंवैवार्चयेत्ततः स्नापयेद्देवदेवेशंपंचामृतविधानतः अर्चयेत्पर
रयाभक्त्यागंधपुष्पादिभिःक्रमात् धूपोदीपोश्चनिवेद्यैस्तांबूलैश्चप्रद
क्षिणैः सपूज्यदेवदेवेशमिमंमंत्रमुदीरयेत् नमस्तेज्ञानरूपायज्ञा
नदायनमोस्तुते नमस्तेसर्वरूपायसर्वसिद्धिप्रदायते एवंप्रणम्यदेवे
शंदेवदेवंजनार्दनं वक्ष्यमाणेनमंत्रेणउपवासान्प्रकल्पयेत् पंचरा
त्रंनिराहारोद्यप्रभृतिकेशव त्वदाज्ञयाजगत्स्वामिन्ममाभीष्टप्रदो

ब्रह्मनारदी० भव एवमभ्यर्च्य देवेशमुपवासान्समर्पयेत् रात्रौ जागरणं कुर्यात्
११६ द्वेकादश्यां व्रती द्विजाः द्वादश्यां च त्रयोदश्यां चतुर्दश्यां जितेंद्रियः पौर्ण
२ मास्यां कर्तव्यमेवं विस्मर्चनं बुधाः। एकादश्यां पौर्णमास्यां कर्तव्यं जागरं द्वि
जाः पंचामृतादिपूजा तु सामान्यादिनपंचसु। हरिं स्नापयद्विसु पौर्णमा
स्यां तु शक्तितः तिलहोमं च कर्तव्यं तिलदानं च सत्तमाः। ततः षष्ठे दिने प्राप्ते
निर्वर्त्य स्वाश्रमक्रियं संप्राप्य पंचगव्यं च अर्चयेत्पूर्ववद्धरिं। ब्राह्मणान्
भोजयेत्पश्चात् विभवे सत्यवारितं ततः स्वबंधुभिः सार्द्धं स्वयं भुंजीत वा पूराणः
ग्यतः एवं पुष्पादिमासेषु कार्त्तिकांतेषु सत्तमः। शुक्लपक्षे व्रतं कुर्यात्पू ११६
र्वमुक्तविधानतः एवं संवत्सरं कुर्यात् व्रतं पापप्रणाशनं पुनर्मासे मा

र्गशीर्षे कुर्यादुद्यापनं व्रती एकादश्यां निराहारो भवेत्पूर्ववदुत्तमाः। द्वा
दश्यां पंचगव्यं च प्राशयेत्सुसमाहितः। गंधपुष्पादिभिः सम्यक् देवदेवं
जनार्दनं। अभ्यर्च्य वासनं दद्यात् ब्राह्मणाय जितेंद्रियः। पायसं मधुसंमि
श्रं घृतयुक्तफलान्वितं॥ सुगंधजलसंयुक्तं पूर्णकुंभं सदक्षिणं। वस्त्रेणा
छादितं कुंभं पंचरत्नसमन्वितं। दधीद्धात्म विदुषे ब्राह्मणा मुनीश्वराः॥
सर्वेशा सर्वभूतेशा सर्वव्यापिन् जनार्दन॥ परमान्नप्रदानेन प्रीतो भव त्वं
माधवः॥ नारायण नमस्तुभ्यं जगत्त्राणपरायणं। कुंभोदकप्रदानेन प्रीतो भ
व जनार्दन। व्रतमेतत्तु यः कुर्यात् हरिपंचकसंज्ञकं। न तस्य पुनरावृत्तिर्ब्रह्म
लोकान्कदाचन। व्रतमेतत्तु कर्तव्यमिच्छद्भिर्मोक्षमुत्तमं। समस्तपापकं

तारद्वावानलसमं द्विजाः। गवां कोटिसहस्राणि दत्वा यत्फलमश्नुते तत्फलं सम
वाप्नोति एकस्मादुपवासतः। यस्त्वेतच्छृणुयाद्भक्त्या नारायणपरायणः। स मु
च्यते महाघोररूपपातककोटिभिः इति श्रीबृहन्नारदीये एकोनविंशो
ऽध्यायः १९ सूत उवाच अन्यद्व्रतवरं वक्ष्ये शृणुध्वं सुसमाहिताः।
सर्वपापहरं पुण्यं सर्वलोकोपकारकं। आषाढे श्रावणे वापि तथा भाद्रपदे
ऽपि वा। तथा चाश्वयुजे वापि कुर्यादेतद्व्रतं द्विजाः। एतेष्वन्यतमे मासि शुक्लप
क्षे जितेंद्रियः। प्रातर्दशम्यां स्नायीत दंतधावनपूर्वकं। नित्यं देवार्चनं कुर्या
न्नियतो नियतेंद्रियः। एकादश्यां ब्रह्मचारी अधःशायी जितेंद्रियः। प्रार्थये
त्संचगर्भं च स्वपेद्विष्णुसमीपतः। ततः प्रातः समुत्थाय नित्यकर्म्म समा

प्य च। श्रद्धया पूजयेद्विष्णुं वशी क्रोधविवर्जितः। विद्वद्भिः सहितो विष्णुमर्च्च
यित्वा यथोदितं। संकल्पं तु ततः कुर्यात्स्वस्तिवाचनपूर्वकं। मासमेकं निरा
हारो ह्यद्यप्रभृति केशव। मासांते पारणं कुर्यां देवदेव त्वदाज्ञया। तपोरूप न
मस्तुभ्यं तपसां फलदायक। ममाभीष्टफलं देहि सर्वविघ्नान्निवारय। एवं स
मर्प्य देवस्य विष्णोर्मासव्रतं शुभं। तदाप्रभृत्या मासांतं निवसेद्धरिमंदिरे।
प्रत्यहं स्नापयेद्देवं पंचामृतविधानतः। दीपं निरंतरं कुर्यात्तस्मिन्मासे ह
रेर्गृहे। प्रत्यहं दंतकाष्ठं च अपामार्गस्य कारयेत्। कृत्वा स्नायी च विधिव
त् नारायणपरायणः। तर्पणं विष्णवे कुर्यात्केशवाद्यैस्तु नामभिः। द्वादश्या
मि विष्णुपूजामेभिरेवं समाचरेत्। एवं मासोपवासं च कुर्याद्धरिपरायणः।

तदंते च प्रयतः स्नायात् विष्णुं पूर्ववदर्चयेत्। ब्राह्मणान् भोजयेच्छक्त्या भक्तियु
क्तः सदक्षिणं। स्वयं च बंधुभिः सार्द्धं भुंजीत प्रयतेंद्रियः। व्रतं मासोपवासाख्य
मेवं कुर्यात्त्रयोदश। तदंते वै दद्विष्णवे गां दद्याच्च सदक्षिणां। ब्राह्मणान् भोजये
च्छक्त्या द्वादश प्रयतेंद्रियः। शक्त्या च दक्षिणां दद्यात् वस्त्राण्याभरणानि च। मा
सोपवासनिकेन वाजिपेयफलं लभेत्। यदि द्वयं कृतं तस्य पौंडरीकफलं ल
भेत्। मासोपवासत्रितयं यः कुर्यात्प्रयतेंद्रियः। चतुः कृतस्तेन पराकं मुनिस
त्तमाः। स लभेत्परमं पुण्यमग्निष्टोमाख्यसंभवं। पंचकृत्वो व्रतमिदं कृतं येन मम
हात्मना। अत्यग्निष्टोमजं पुण्यं द्विगुणं प्राप्नुयान्नरः। मासोपवासं षट्कृत्वः कुर्या
द्यस्तु समाहितः। ज्योतिष्टोमस्य यज्ञस्य फलमष्टगुणं भवेत्। निराहारेण यो

मासं सप्तकृत्वस्तथा नयेत्। अश्वमेधस्य यज्ञस्य फलमष्टगुणं भवेत्। मासो
पवासं यः कुर्यात् अष्टकृत्वो मुनीश्वराः। नरमेधस्य यज्ञस्य फलमष्टगुणं भ
वेत्। यस्तु मासोपवासं च नवकृत्वः समाचरेत्। गोमेधमखजं पुण्यं लभते त्रिगु
णं नरः। दशकृत्वस्तु यः कुर्यात् पराकं मुनिपुंगवाः। स याति ब्रह्ममेधस्य त्रिगु
णं फलमुत्तमं। एकादश पराकांश्च यः कुर्यात्संयतेंद्रियः। स याति हरिसारूप्यं
सर्वभोगसमन्वितं। त्रयोदश पराकांश्च यः कुर्यात्प्रयतो नरः। स याति परमा
नंदं यत्र गत्वा न शोचति। मासोपवासनिरता गंगास्नानपरायणं। धर्ममा
र्गप्रवक्तारो मुक्ता एव न संशयः। यतीनां ब्रह्मचारीणां अधवानां च सत्तमाः
मासोपवासः कर्त्तव्यो वनस्थानां विशेषतः। नारी वा पुरुषो वापि व्रतमेतत्सु

दुर्लभं ॥ कृत्वा मोक्षमवाप्नोति योगिनामपि दुर्लभं ॥ गृहस्थो वा वनस्थो वा वर्णी
वा भिक्षुरेव वा ॥ प्रद्वेषतश्चानश्नन्नोपि मोक्षमस्माल्लभेन्नरः ॥ य इदं व्रतमाहात्म्यं
नारायणपरायणः ॥ शृणुयाद्धारयेद्वापि सर्वपापैः प्रमुच्यते ॥ इति श्रीबृहन्ना
रदीये विंशोऽध्यायः ॥ ॥२०॥ इदमन्यत्प्रवक्ष्यामि व्रतं त्रिलोक्यविश्रुतं ॥
सर्वपापप्रशमनं सर्वकामफलप्रदं ॥ कर्त्तव्यं सर्वथा विप्रैः विष्णुप्रीणनका
रणात् ॥ ब्राह्मणः क्षत्रियविशां शूद्राणां च योषितां ॥ मोक्षदं कुर्वतां भक्त्या
विष्णोः प्रियतरं द्विजाः ॥ एकादशीव्रतं नाम सर्वकामफलप्रदं ॥ कर्त्तव्यं स
र्वथा विप्रैर्विष्णुप्रीणनकारणात् ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि
॥ यदि भुंक्ते स पापी स्यात्परत्र नरकं व्रजेत् ॥ उपवासफलं लिप्सुर्जह्याद्भु

क्तिचतुष्टयं ॥ पूर्वापरदिने रात्र्यामहोरात्रं तु मध्यमं ॥ एकादश्यां दि
ने यस्तु भोक्तुमिच्छति सत्तमाः ॥ स भोक्तुं सर्वपापानि स्पृहयालुर्न संश
यः ॥ भवेद्दशम्यामेकाशी द्वादश्यां च मुनीश्वराः ॥ एकादश्यां निराहा
रो यदि मुक्तिमभीप्सति ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥
ऽन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे ॥ ब्रह्महत्यादिपापानां कथंचिन्नि
ष्कृतिर्भवेत् ॥ एकादश्यां तु यो भुंक्ते निःकृतिर्नापि कुत्रचित् ॥ महापातक
युक्तो वा युक्तो वा सर्वपातकैः ॥ एकादश्यां निराहारः स्थित्वा याति परं पदं ॥
एकादशी महापुण्या विष्णोः प्रियतरा तिथिः ॥ संसेव्या सर्वथा विप्रैः संसारच्छे
दलिप्सुभिः ॥ दशम्यां प्रातरुत्थाय दंतधावनपूर्वकं ॥ स्नात्वा च विधिवद्विष्णुमं

र्ज्जयेत्संयतेंद्रियः॥एकादशीं च नवेन्नस्मिन्नतदिनःगृहीतेंद्रियः॥विशेषाःसमी
पेशयीत नारायणपरायणः॥एकादश्यां तथा स्नात्वा संपूज्य च जनार्दनं॥गंध
पुष्पादिभिःसम्यक्‌ततस्त्वेवमुदीरयेत्॥एकादश्यां निराहारः स्थित्वाह
न्निपरेह्यहं॥भोक्ष्यामि पुंडरीकाक्ष शरणं मम भवाच्युत॥इमं मंत्रं समुच्चा
र्य देवदेवस्य चक्रिणः॥भक्तिभावेन तुष्ट्या उपवासं समर्पयेत्‌ दिवस्यः पु
रतः कुर्यात्‌ जागरं नियतेंद्रियः॥शृणु विप्र प्रवक्ष्यामि जागरस्य च लक्षणं॥
येन विज्ञातमात्रेण दुर्लभो न जनार्दनः॥गीतं वाद्यं च नृत्यं च पुराणपठनं त
था॥धूपं दीपं च नैवेद्यं पुष्पगंधानुलेपनं॥फलमर्घ्यं च श्रद्धा च दानमिंद्रिय
संयमः॥सत्यान्वितं विनिद्रं च मुदा युक्तं क्रियान्वितं॥प्रदक्षिणाभिः संयुक्तं

पापालस्यादिवर्जितं॥नीराजनसमायुक्तं नमस्कारपुरःसरः॥यामे यामे महाभाग
कुर्यादारात्रिकं हरेः॥षड्भिर्गुणैः संयुक्तं एकादश्यां तु जागरं यः करोति नरो न
तस्या न पुनर्जायते भुवि॥य एवं कुरुते भक्त्या वित्तशाठ्यविवर्जितः॥जागरं वास
रे विष्णोर्लीयते परमात्मनि॥धनवान्‌ वित्तशाठ्येन यः करोति प्रजागरं॥तेना
त्मा हारितो नूनं कितवेन दुरात्मना॥दष्टाः कलिभुजंगेन स्वपंति मधुहादि
ने॥कुर्वंति जागरं नैव मायापाशविमोहिताः॥प्राप्याप्येकादशीं येषां कलौ
जागरणं विना॥ते विनष्टा न संदेहो यमाज्ञीविमसं ध्रुवं॥अभावे वाचकस्या
पि गीतं नृत्यं च कारयेत्‌ वाचके सति विप्रेंद्र पुराणं प्रथमं पठेत्॥यः पुनः कु
रुते गीतं नृत्यं जागरणं हरेः॥वसेच्चिरं तु वैकुंठे पितृभिः सह भूसुरः॥

मतिंप्रयछतेयस्तुहरिर्जागरणंप्रति। षष्टिवर्षसहस्राणिश्वेतद्वीपेवसेन्नरः॥पा
दयोःपतिपयावत्धरण्यांपांसुगछतां॥ वह्वर्षसहस्राणिजागरीवसतेदि
वि। तस्मात्सहात्म्रगंतव्यंजागरेमाधवप्रियं॥ द्वादश्यांजगरेविह्लोयैःकृतं
पषमंडपं॥प्रतिपुष्पंफलंतेषांवाजिमेधसमंद्विजाः॥ भावैरेतिर्नराये
स्तुकुरुतेजागरंहरेः॥निमिषेनिमिषेपुण्यंतीर्थटिसमंस्मृतं॥ततःप्रा
तःसमुत्थायद्वादश्यांदिवसेव्रतं॥स्नात्वाचविधिवद्विष्णुंपूजयेन्नियते
न्द्रियः॥पंचामृतेनसंस्नाप्यएकादश्यांजनार्दनं॥द्वादश्यांपयसास्ना
प्यकृतकृत्योभवेन्नरः॥अज्ञानतिमिरांधस्यव्रतेनानेनकेशव।प्रसी
दसुमुखोनाथज्ञानदृष्टिप्रदोभव॥एवंविप्रज्ञाप्यविप्रेंद्रादेवदेवस्यच

क्रिणः॥ब्राह्मणान्भोजयेत्पश्चात्दद्याद्वैदक्षिणांतथा॥ततश्चबंधु
भिःसार्द्धनारायणपरायणः॥कृतपंचमहायज्ञःस्वयंभुंजीतवाग्यतः॥
एवंयःकुरुप्रयतःकुर्यात्पुण्यमेकादशीव्रतं॥सयातिविष्णुभुवनंपुन
रावृत्तिदुर्लभं॥उपवासव्रतपरोधर्मकारीचसत्तमाः॥चांडालान्पतितां
श्चैववाङ्मात्रेणापिनालपेत्॥नास्तिकान्भिन्नमर्यादान्निंदकान्
पिशुनान्तथा॥उपवासव्रतपरोनालपेत्सर्वथाबुधः॥वृषलीसूतिपो
ष्यारंवृषलीपतिमेवच॥अयाज्ययाजकंचैवपरस्त्रीनिरतंतथा॥भिष
जंशास्त्ररहितंदेवद्विजविरोधिनं॥परान्नलोलुपंचैवनालपेत्सर्वथा
व्रती॥इत्येवमादिभिःशुद्धोवशीसर्वहितेरतः॥उपवासपरोभूत्वापरां

बृनारदी०
१२२

सिद्धिंगमिष्यसि॥ नास्तिगंगासमंतीर्थंनास्तिमातृसमोगुरुः॥ नास्तिवि
ष्णुसमोदेवस्तपोनानशनात्परं॥ नास्तिवेदसमंशास्त्रंनास्तिशांतिसमंसु
खं॥ नास्तिसत्यसमंज्योतिर्नास्तिकीर्तिसमंधनं॥ नास्तिज्ञानसमोलाभ
व्रतंचैकादशीसमं॥ अत्रैवोदाहरंतीममितिहासंपुरातनं॥ संवादभद्र
शीलस्यतत्पितुर्गालवस्यच॥ पुराहिगालवोनाममुनिःसत्यपरायणः॥ उ
वासनर्मदातीरेशांतोदांतस्तपोनिधिः॥ बहुवृक्षसमाकीर्णेमृगव्रजनि
षेविते॥ सिद्धचारणगंधर्वयक्षविद्याधरान्विते॥ कंदमूलफलैःकीर्णमुनि
वृंदनिषेविते॥ गालवोनामविप्रेंद्रोनिवासमकरोच्चिरं॥ तस्याभवद्भद्र पुरु:
शीलइतिख्यातःसुतोवशी॥ जातिस्मरोमहाभागोनारायणपरायणः १२२

बालक्रीडनकालेपिभद्रशीलोमहामुनिः॥ मृदावविष्णोःप्रतिमांकृत्वापू
जापरोभवत्॥ मित्राणांबोधयत्येवविष्णुःपूज्योनरैरिति॥ एकादशीव्रतं
चैवकर्त्तव्यमितिपंडिति॥ एतेनबोधिताश्चापिशिशवःसुनिनिष्ठिताः॥
हरिंमृद्देवनिर्मायसदापूजारताभवत्॥ नमस्कुर्वन्भद्रशीलोविष्णवे
सर्वजिष्णवे॥ सर्वेषांजगतांस्वस्तिभूयादित्यब्रवीत्सदा॥ क्रीडाकाले
मुहूर्तंचमथापिवा॥ एकादशीतिसंकल्प्यविष्णवेप्रणमत्यसौ॥ एवंसु
चरितंदृष्ट्वातनयंगालवोमुनिः॥ अपृच्छद्विस्मयाविष्टोसमालिंग्यत
पोनिधिः॥ गालवउवाच॥ भद्रशीलमहाभागभद्रशीलोसिसुव्र
त॥ चरितंमंगलंयत्तेयोगिनामपिदुर्लभं॥ हरिपूजारतोनित्यंस

र्वभूतहितेरतः॥एकादशीव्रतपरोलोकानुग्रहतत्परः॥निर्द्वंद्वोनिर्ममः
शांतोहरिध्यानपरायणः॥जातेयंपरमाबुद्धिःकथंवक्तुंममार्हसि॥सूत
उवाच॥ ॥भद्रशीलःपितुर्वाक्यंश्रुत्वाप्रहसिताननः॥स्वानुभूतंयथावृ
त्तंसर्वंपित्रेन्यवेदयत्॥भद्रशीलउवाच॥ ॥शृणुतातमहाभागअनु
भूतंयथापुरा॥जातीस्मरत्वाकृतानामि॥यमेनपरिभाषितं॥एतच्छ्रुत्वामु
निश्रेष्ठोगालवोविस्मयान्वितः॥उवाचप्रीतिमापन्नोभद्रशीलंमहामतिं
॥गालवउवाच॥ ॥कस्त्वंपूर्वंमहाभागकिमुक्तंचयमेनते॥कस्यवाकेन
हेतोश्चतत्सर्वंवक्तुमर्हसि॥ ॥भद्रशीलउवाच॥ ॥अहमासंपुरातात
राजासोमकुलोद्भवः॥धर्मकीर्तिरितिख्यातोदत्तात्रेयनशासितः॥न

ववर्षसहस्राणिमहींकृत्स्नामपालयं॥अधर्माश्चतथाधर्मामयानुबहवःकृ
ताः॥ततःश्रियाप्रमत्तोऽहंबद्धधर्माप्यकारुषं॥पाषंडजनसंसर्गात्पाषं
डचरितोभवं॥पुरार्जितानिपुण्यानिमयातुसबहून्यपि॥पषंडालापमा
त्रेणप्रनष्टानितपोधन॥पाषंडिबोधितोहंतुवेदमार्गंसमत्यजं॥अधर्मनि
रतंमांतुदृष्ट्वामद्देशजाःप्रजाः॥सदेवदुःकृतंचक्रुःषष्ठांशस्तत्रमेभवत्
॥एवंपापसमाचारोव्यसनाभिरतःसदा॥मृगयाभिरतोभूत्वाह्येकदाप्रावि
शंवनं॥ससैन्योहंवनेतत्रहत्वाबहुविधान्मृगान्॥क्षुत्तृट्परिवृतःश्रांतोरे
वातीरमुपागमं॥प्रहढतपविक्रांतोरेवायांस्नानमाचरं॥अदृष्टसैन्यएका
कीपिडमानक्षुधानुसहः॥जागरंकृतवांस्तातसेनयारहितोनिशि॥अधश्च

मपिरिश्रांतःक्षुत्पिपासाप्रपीडितः॥तत्रैवजागरांतेहंतातपंचत्वमागतः॥
ततोयमभटैर्बद्धोमहादंष्ट्राभयंकरैः॥अनेकक्लेशसंपन्नान्मार्गान्नीतो
यमांतिकं॥दंष्ट्राकरालवदनपरूपमवर्त्तिनं॥अथकालश्चित्रगुप्तमाहू
येदमभाषत॥कालउवाच॥ ॥अस्यशिक्षाविधानंयथावद्वदपंडित॥
एवमुक्तश्चित्रगुप्तोधर्मराजेनसत्तमाः॥चिरंविचारयामासपुनश्चेदमभा
षत॥आसीपापरतःसततंपापिष्टएषधर्मप॥एकादसीदिनेह्येषोरेवा
तीरेमनोरमे॥जागरंचोपवासंचकृत्वापापैर्विमोचितः॥यानिकानिचपा
पानिकृतानिसुबहूनिच॥तानिसर्वाणिनष्टानिउपवासप्रभावतः॥ए
वमुक्तोधर्मराजश्चित्रगुप्तेनधीमता॥नानामदंडवद्भूमौममताहेति

कंपितः॥पूजयामासमांतातभक्तिभावेनधर्मराट्॥ततश्चस्वभटान्सर्
वान्आहूयेदमुवाचच॥यमउवाच॥शृणुध्वंमद्वचोदूताःहितंवक्ष्याम्य
नुत्तमं॥धर्मेषुनियतान्मर्त्यान्मानयध्वंममांतिकं॥येविष्णुभक्तिनिरताःप्र
यताःकृतज्ञाःएकादसीव्रतपराविजितेंद्रियाश्च॥नारायणाच्युतहरेशरणं
भवेतिशांतावदंतिसततंतरसात्यजध्वं॥नारायणाच्युतजनार्दनकेशवविष्णो
पद्मेशपद्मजपितःशिवशंकरेति॥नित्यंवदंत्यखिललो॥कहितःप्रशांता
दूराद्भटास्त्यजततान्ममिवशिक्षाः॥नारायणार्पितक्रियान्हरिभक्तिभ
क्तान्स्वाचारमार्गनिरतान्गुरुसेवकांश्च॥सत्पात्रदाननिरतान्ह
रिकीर्तिभक्तान्दूतास्त्यजध्वमनिशंहरिनामसक्तान्॥पाषंडसंगर

बृ॰नारदी॰ हितान्द्विजभक्तिसक्तान्सत्संगलोलुपरतोश्चतथाविधेयान्॥शंभोहरेश्च
१२५ समबुद्धिमतःस्तथैवदूतास्त्यजध्वमुपकारपरान्नराणां॥येवीक्षिताहरिकथा
मृतसेवकेश्चनारायणस्मृतिपरायणमानसेश्च॥विप्रेंद्रपादजलसेवन
संप्रहृष्टान्तान्पापिनोपिचभटाःसततंत्यजध्वं॥शंखचक्रांकितान्मर्त्या
न्रामभक्तान्स्मिकजन्मकान्॥वर्णान्वर्णैर्भूतरांश्चैवत्यजध्वंदूरतोभटाः
॥येमान्रतान्परिनिष्ठुरशालिनश्चलोकद्विषोद्विजजनोहितकर्मिणश्चदे
वश्चलोभनिरतान्जननाशहेतून्तानानयध्वमपराधपरांश्चदूताः॥ए
कादशीव्रतपराङ्मुखमुग्रशीलंलोकापवादनिरतंपरनिंदकंच॥ग्रामस्य पुरा॰
नाशकरमुत्तमनिंदकंच॥दूताःसमानयतविप्रधनेषुलुब्धं॥येविष्णुभक्ति १२५

विमुखाननमंतियेच॥नारायणायशरणागतपालनाय॥विष्ण्वालयंचनदिया
तिनरोतिमूर्खःस्तानानयध्वमतिपापरतंप्रशस्य॥एवंसत्कृतवानूपूर्वंयमेन
परिभाषितं॥नेद्येहमनुतापेनस्मृत्वातत्कर्मतंत्रवै॥पितर्मेमानुतापेनतत्कर्म
श्रवणेनच॥तद्दिवससर्वपापानिनिःशेषंविगतानिभोः॥पापशेषविनिर्मुक्तंह
रिसारूप्यतांगतं॥सहस्रसूर्यसंकाशंमांननामयमस्तदा॥एतद्दृष्ट्वाविस्मि
तास्तेयमदूताभयोत्कटाः॥विश्वासपरमचक्रुःयमोक्ताःसर्वएवते॥ततःसं
पूज्यमांकालोविमानशतसंकुलं॥सद्यःसंप्रेषयामासतद्विष्णोःपरमंपदं
॥विमानकोटिभिःसार्द्धंसर्वभोगसमन्वितैः॥कर्मणातेनजनकविष्णुलो
केमयोषितं॥कल्पकोटिसहस्राणिकल्पकोटिशतानिच॥स्थित्वाविष्णुपदे

पश्चाश्चादिद्रलोकंसमागतः॥तत्रापिसर्वभोगाढ्यःसर्वदेवनमस्कृतः॥ताव
त्कालंदिविस्थित्वाततोभूमिसमागतः॥अत्रापिविप्रप्रवरकुलेमहतिसंभवः
॥जातिस्मरत्वाज्जानामिसर्वमेतन्मुनीश्वराः॥तस्माद्विमुच्चनोद्योगंताताहं
प्रकरोमिवि॥एकादशीव्रतमिदमितिनज्ञातवान्पुरा।जातिस्मृतिप्रभावेनत
तज्ज्ञातंसाधुतंमया॥अवशेनापियत्कर्मकृतंतस्यफलंत्विदं॥एकादशी
व्रतंभक्त्याकुर्वताकिमुतप्रभोतिसततस्माच्चरिष्येजनकश्रुणमेकादशीव्र
तं॥विष्णुपूजांचाहरहःपरमस्थानकांक्षया॥एकादशीव्रतंयेतुकुर्वंतिश्र
द्धयानराः॥तेयांतिविष्णुभवनंपरमानंददायकं॥यस्त्वेतछृणुयान्नित्यंपठे
द्वाभक्तिभावतः॥ससर्वपापनिर्मुक्तोविष्णुलोकेमहीयते॥सूतउवाच॥ ॥

एवंपुत्रवचःश्रुत्वासंतुष्टोगालवोमुनिः॥अवापपरमांतुष्टिंमनसाचातिहर्षि
तः॥मत्कृतस्यफलंजातंमहद्दूराःपावनीकृतः॥यतोसौमत्कुलेजातोविष्णुभ
क्तिपरायणः॥इतिसंतुष्टचेतास्सतस्यपुत्रस्यधीमतः॥हरिपूजाविधा
नंचयथावत्समबोधयत्॥इत्येतद्वोमुनिगणायथावत्कथितंमया॥संकोच
विस्तराभ्यांचकिमन्यत्कथयामिव॥ ॥इतिश्रीबृहन्नारदीयेएकविंशोऽ
ध्यायः॥ ॥२१॥ ॥ऋषयऊचुः॥ ॥कथितंभवतासर्वंसूततत्वार्थको
विद॥भागीरथ्याश्चमहिमांधर्माधर्मांश्चसत्तम॥हरिपूजाविधानंचए
तानिचसुविस्तरं॥एकादश्याश्चमहिमात्वयाप्रोक्ताविशेषतः॥इदानीं
श्रोतुमिच्छामोवर्णाचारविधिंमुने॥तथैवचाश्रमाचारंप्रायश्चित्तविधि

तथा॥ एतत्सर्वंमहाभागसूतसर्वार्थकोविद ॥कृपयापरयाविष्टोयथावद्वक्तु
मर्हसि॥सूतउवाच॥ ॥शृणुध्वमृषयःसर्वेयदुक्तंब्रह्मसुनुना॥सनत्कुमा
रमुनयेवर्णाचारविनिर्णयः॥वर्णाश्रमाचारयुतैःपूज्यातेहरिरव्ययः॥त
स्माद्वक्ष्यामिविप्रेंद्रामन्वाद्यैश्चोदितंचयत्॥ब्राह्मणाःक्षत्रियाविश्याःशूद्र
श्चत्वारएवते॥वर्णाइतिसमाख्याताएतेषांब्राह्मणोधिकः॥ब्रह्मणःक्ष
त्रियोविश्योद्विजःप्रोक्तस्त्रिजस्तथा॥मातृतश्चोपनयनाद्दीक्षयाजन्मवि
क्रमात्॥एभिर्वर्णैःसर्वधर्माकार्यावर्णानुरूपतः॥स्ववर्णधर्मत्यागेनपा
षंडःप्रोच्यतेबुधैः॥स्वगृह्योक्तंचोदितंकर्मद्विजःकुर्वन्कृतीभवेत्॥अस्व पुरा॰
र्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु॥समुद्रयात्रास्वीकारःकमंडलुविधार १२७

रणं॥द्विजानामसवर्णासुकन्यासूपयमंतथा॥देवरेणसुतोत्पत्तिर्मधुपर्केपशो
र्वधः॥मांसादनंतथाश्राद्धेवानप्रस्थाश्रमंतथा॥दत्ताक्षतायाःकन्यायाःपुनर्दा
नंपरस्यच॥दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधको॥महाप्रस्थानगमनंगोम
धंचतथामखं॥इमान्कलियुगेधर्मान्वर्ज्यानाहुर्मनीषिणः॥देशाचारा
परिग्राह्यास्तत्तद्देशीयजैर्नरैः॥अन्यथापतितोज्ञेयःसर्वधर्मबहिःकृतः॥
ब्राह्मणक्षत्रियविशांशूद्राणांचिवसत्तमाः॥क्रियाःसामान्यतोवक्ष्येशृणुध्वं
सुसमाहिताः॥दानंदद्याद्विजेंद्राणांयज्ञैर्देवान्यजेत्तथा॥वृत्त्यर्थंयाचये
द्विप्रअन्यान्नध्यापयेत्तथा॥याजयेद्यजनेयोग्यान्विप्रोनित्योदकीभवेत्
॥नकेस्याप्यहितंकुर्यात्विष्णुपूजापराभवत्॥दानानिदद्याद्विप्राणांक्षत्रि

योपिद्विजोत्तमाः॥ कुर्याच्चवेदग्रहणंयज्ञैर्देवान्यजेत्तथा॥ शस्त्राजीवोभवेत्त
स्यपालयेद्धर्मतोमहीं॥ दुष्टानांशासनंकुर्यात्शिष्टानांपरिपालनं॥ पाशुपा-
ल्यंचवाणिज्यंकृषिश्चद्विजसत्तमाः॥ वेदस्याध्ययनंचैवविश्यस्यापिप्रकीर्त्तितं
॥ दद्याद्दानंचविप्राणांयज्ञैर्देवान्यजेतवै॥ कुर्याच्चदारग्रहणंधर्मांश्चैवसमा
चरेत्॥ क्रयविक्रयजैश्चापिधनैःकारुभवेनवादद्याद्दानानिशूद्रोपिदान
यज्ञैर्विशुध्यति॥ ब्राह्मणक्षत्रियविशांशुश्रूषानिरतोभवेत्॥ सामान्य
धर्मानाह॥ ऋतुकालाभिगमनंस्वदारेषुप्रशस्यते॥ सर्वलोकहि
तैषित्वंमंगलंप्रियवादिता॥ अनायासोमनोत्साहःतितिक्षानातिमानितो
॥ सामान्यंसर्ववर्णानांमुनिभिःपरिकीर्त्तितं॥ सर्वेचमुक्तिमायांमिति-

स्वाश्रमोचितकर्मणा॥ ब्राह्मणःक्षत्रियाचारमाचरेदापदिद्विजाः॥ क्षत्रि
योपिचविट्वृत्तिमत्यापदिसमाश्रयेत्॥ नाश्रयेच्छूद्रवृत्तिंतुअत्यापद्यपिवि
द्विजाः॥ यद्याश्रयोपिद्विजोमूढःसचांडालइतिस्मृतः॥ ब्राह्मणक्षत्रियविशो-
द्विजाइतिहिविश्रुताः॥ चत्वारआश्रमास्तेषांपंचमोनोपपद्यते॥ ब्रह्मचा-
रीगृहीवानप्रस्थोभिक्षुश्चतुर्थकं॥ एतेनामाश्रमाःप्रोक्ताःपंचमोनोपपद्यते
॥ चतुर्भिराश्रमैरेभिःसाध्यतेधर्मउत्तमः॥ विष्णुस्तुष्यविप्रेंद्राकर्मयोगरता
त्मनां॥ निस्पृहाःशांतमनसःस्वकर्मपरिनिष्ठिताः॥ तेयांतिपरमंस्थानं
नावर्त्ततयतःपुनः॥ इतिश्रीबृहन्नारदीयेद्वाविंशोध्यायः॥ ॥२२॥
॥ सूतउवाच॥ ॥ वर्णाश्रमाचारविधिंप्रवक्ष्यामिविशेषतः॥ शृणुध्वं-

षयःसेर्वसुसमाहितचेतसः॥ यःस्वकर्मपरित्यज्यपरकर्मनिषेवते॥ पाषंडः
सहिविज्ञेयःसर्वकर्मबहिःकृतः॥ गर्भाधानादिसंस्काराःकार्यामंत्रविधानतः
॥ स्त्रीणाममंत्रतःकार्यायथाकालंयथाविधि॥ सीमंतप्रथमेगर्भेचतुर्थेमा
सिशस्यते॥ षष्टेवासप्तमेवापिअष्टमेवापिकारयेत्॥ जातेपुत्रेपितास्नात्वा
सचैलजातकर्मसु॥ कुर्याच्चनांदीश्राद्धंचस्वस्तिवाचनपूर्वकं॥ हेम्नापवातु
षधान्यैर्वाजातश्राद्धंप्रकल्पयेत्॥ अन्नेनकारयेद्यस्तुसचांडालसमोभवेत्
॥ कृत्वाभ्युदयिकंश्राद्धंपित्रापुत्रस्यवाग्यतः॥ कुर्वीतनामनिर्दिष्टंसूतकां
तेयथाविधि॥ अस्पष्टमर्थहीनंचअतिगुर्वक्षरान्वितं॥ नदद्यान्नामवि

प्रेंद्रास्तथाचविषमाक्षरं॥ तृतीयेवर्षेचैलंपंचमेषष्ठमेपिवा॥ सप्तमेवाष्ट

मेवापिकुर्याद्गृह्योक्तमार्गतः॥ दैवयोगादतिक्रांतेगर्भाधानादिकर्मणि॥ क
र्तव्यःपादकृच्छ्रोविचौलेर्द्धंप्रकल्पयेत्॥ गर्भाष्टमेवाष्टमेवैब्राह्मणस्यो
पनायनं॥ अषोडशाब्दपर्यंतंकालमाहुश्चगौणतः॥ गर्भैकादशमेवैतु
राजन्यस्योपनायनं॥ आद्वाविंशाब्दपर्यंतंकालमाहुर्विपश्चितः॥ विशो
पनायनंप्रोक्तंगर्भाद्द्वादशमेतथा॥ चतुर्विंशाब्दपर्यंतंकालमाहुर्मनीषि
णः॥ एतत्कालावधेर्यस्यद्विजस्यातिक्रमोयदि॥ सावित्रीपतितंविद्यात्तुना
लपेत्तंकदाचनं॥ द्विजोपनयनेविप्रामुख्यकालव्यतिक्रमे॥ द्वादशाब्दंचरे
त्कृच्छ्रंपश्चाच्चांद्रायणंचरेत्॥ सांतपनंद्वितीयंचविवकृत्वाकर्मसमाचरेत्॥
अन्यथापतितंविद्यात्कर्त्तापित्रब्रह्महाभवेत्॥ मौंजीविप्रस्यविज्ञेयाधनु

बृन्नारदी० यौक्षत्रियस्य तु ॥ आवी वैश्यस्य च विज्ञेयाश्शृणुध्वमजिनं तथा ॥ विप्रस्य प्रो-
१३० क्तामैणेयं रौरवं क्षत्रियस्य वि ॥ आजं वैश्यस्य विज्ञेयं दंडान्वक्ष्ये यथाक्रमा
त् ॥ पालाशं ब्राह्मणस्योक्तं न्टपस्योदुंबरं तथा ॥ बैल्वं वैश्यस्य विज्ञेयं प्रमा
णं शृणुत द्विजाः ॥ विप्रस्य केशमानं स्यात् आललाटं न्टपस्य तु ॥ नासाग्र
संमितं दंडं वैश्यस्य तु विपश्चितः ॥ तथा वासांसि वक्ष्यामि विप्रादीनां यथाक्र
मात् ॥ काषायं चैव मांजिष्ठं हारिद्रं च प्रकीर्त्तितं ॥ उपनीतो द्विजो विप्राः प
रिचर्यापरो गुरुः ॥ वेदग्रहणपर्यंतं निवसेद्गुरुवेश्मनि ॥ प्रातःस्नायी भवे
द्वर्णी समित्कुशफलादिकान् ॥ गुर्वर्थमाहरेन्नित्यं काल्यं काल्यं मुनीश्वराः ॥ पुं रा:
यज्ञोपवीतमजिनं दंडं च द्विजसत्तमाः ॥ नष्टे भ्रष्टे नवं मंत्रात् धृत्वा भ्रष्टं ज १३०

ले क्षिपेत् ॥ वर्णिनो वर्त्तनं प्रोक्तं भिक्षान्नेनैव केवलं ॥ भिक्षां च श्रोत्रियागारादाहरे
त्प्रयतेंद्रियः ॥ कुर्यात्प्रतिदिनं यज्ञी ब्रह्मयज्ञं च तर्पणं ॥ अग्निकार्यपरित्यक्तः पति
तः प्रोच्यते बुधैः ब्रह्मयज्ञविहीनश्च ब्रह्महा परिकीर्त्तितः ॥ देवताभ्यर्चनं कुर्यात्
शुश्रूषानुपदं गुरोः ॥ भिक्षान्नं भोजयेन्नित्यं नैकान्नादी कदाचन ॥ आनीया
निंद्यविप्राणां गृहात् भिक्षां जितेंद्रियः ॥ निनिवेद्य गुरवेऽश्नीयात् वाग्यतस्त
दनुज्ञया ॥ मधुस्त्रीमांसलवणतांबूलं दंतधावनं ॥ उच्छिष्टभोजनं चैव दिवास्वापं
च वर्जयेत् ॥ छ ॥ तत्र पादुकगंधांश्च तथा माल्यानुलेपने ॥ जलकेलीद्यूतगीतवा
द्यं च परिवर्जयेत् ॥ परिवादं चोपतापं विप्रलापं तथांजनं ॥ पाखंडजनसंयोगं शू
द्रसंगं च वर्जयेत् ॥ अभिवादनशीलः स्यात् वृद्धेषु च यथाक्रमं ॥ ज्ञानवृद्धास्तपो

वृद्धाश्च वयोवृद्धा इति त्रयः ॥ अध्यात्मिकादिदुःखानि निवारयति यो गुरुः ॥ वेदशा
स्त्रोपदेशेनैतं पूर्वमभिवादयेत् । असावहमिति ब्रूयात् द्विजो विप्राभिवादने
॥ नाभिवाद्यश्च विप्रेण क्षत्रियाद्यः कदाचन ॥ नास्तिकं भिन्नमर्यादं कृतघ्नं
ग्रामयाजकं ॥ स्तेनं च कितवं चैव कदाचिन्नाभिवादयेत् । पाषंडं पतितं व्रात्य
तथा नक्षत्रजीवनं ॥ तथा पातकिनं चैव कदाचिन्नाभिवादयेत् ॥ उन्मत्तं च
शठं धूर्तं धावंतमशुचिं तथा ॥ अभ्युक्तशिरसं चैव कदाचिन्नाभिवादयेत् ॥
तथा स्नानं प्रकुर्वंतं समित्पुष्पकरं तथा ॥ उदपात्रधरं चैव भुंजंतं नाभिवा
दयेत् ॥ नर्तकीं पुष्पिणीं जारां सूतिकां गर्भपातिनीं ॥ कृतघ्नीं च तथा चंडां क
दाचिन्नाभिवादयेत् ॥ सभायां सत्रशालायां देवतायतनेष्वपि ॥ प्रत्येकं तु न

मस्कारं हंति पुण्यं पुराकृतं ॥ श्राद्धं व्रतं तथा दानं देवताभ्यर्चनं तथा ॥ यज्ञं च तर्पणं चै
व कुर्वंतं नाभिवादयेत् ॥ कृतेभिवादने यस्तु न कुर्यादनं ॥ नाभिवाद्यः स विज्ञेयो यथा
शूद्रस्तथैव सः ॥ प्रक्षाल्य पादावाचम्य गुरोरभिमुखः सदा ॥ तस्य पादौ च संगृह्य
अधीयीत विचक्षणः ॥ अष्टकासु चतुर्दश्यां प्रतिपत्सर्वयोस्तथा ॥ महाभरण्यां
विप्रेंद्र श्रवणद्वादशीदिने ॥ भाद्रपदापरपक्षाद्वितीयायां तथैव च ॥ माघस्य
सप्तमीशुक्लानवम्यामाश्वयुजे तथा ॥ परिवेषान्विते सूर्ये श्रोत्रिये गृहमागते ॥ बंधि
ते ब्राह्मणे चैव प्रवृद्धे कलहे तथा ॥ संध्यायां गर्जिते मेघे ह्यकाले वर्षिते तथा ॥ उ
ल्काशनिप्रपाते च तथा विप्रावमानिते ॥ मन्वादिषु च विप्रेंद्र युगादिषु च न ह्यपि
॥ नाधीयीत द्विजः कश्चित् सर्वकर्मफलेप्सुकः ॥ श्राद्धकृत्तीयाविशाखेप्रेत

पक्षेत्रयोदशी॥ कार्त्तिकेनवमीशुक्लामाघमासेचपूर्णिमा॥ एतेयुगादयःप्रोक्ताद
त्तस्याक्षयकारकाः॥ मन्वादींश्चप्रवक्ष्यामिशृणुध्वंसुसमाहिताः॥ आश्वयुक्छु
क्लनवमीकार्त्तिकेद्वादशीसिता॥ तृतीयाचैत्रमासस्यतथाभाद्रपदस्यच॥ आ
षाढशुक्लदशमी॥ सितामाघस्यसप्तमी॥ श्रावणस्याष्टमीकृष्णातथाषाढेचपू
र्णिमा॥ फाल्गुनस्यत्वमावास्यापुष्यस्यैकादशीतथा॥ कार्त्तिकीफाल्गुनीचैत्री
ज्येष्ठीपंचदशीसिता॥ मन्वादयःसमाख्यातादत्तस्याक्षयकारकाः॥ द्विजैः
श्राद्धंप्रकर्त्तव्यंमन्वादिषुयुगादिषु॥ श्राद्धेनिमंत्रितश्चैवग्रहणेचंद्रसूर्ययोः॥
अयनद्वितीयेचैवनाधीयीतद्विजोत्तमाः॥ शवानुगमनेचैवआरण्यंसम
धीत्यच॥ सूतकद्वितयेचैवअनध्यायाःप्रशस्यते॥ सर्पादिदर्शनेचैवत

था भूकंपनेपिच॥ एवमादिषुसर्वेषुअनध्यायःप्रशस्यते॥ अनध्यायेष्वधीतानां
प्रजांप्रज्ञांयशःश्रियं॥ आयुष्यंनलमारोग्यंनिकृं॰ततियमःस्वयं॥ अनध्याये
षुयोधीतेतंविद्याद्ब्रह्मघातकं॥ नतंसंभाषयेद्विप्रानतेनसहसंवर्णतु॥ कुंड
गोलकयोःकेचित्जडादीनांचसत्तमाः॥ वदंतिचोपनयनंतत्सुत्रादिषुकेच
न॥ अनधीत्यतुयोवेदान्शास्त्राणिपठतेनरः॥ शूद्रउच्यतेसविज्ञेयोनरका
योपपद्यते॥ अनधीतद्विजोयस्तुआचारेषुप्रपद्यते॥ नाचारफलमाप्नोतियथा
शूद्रस्तथैवसः॥ नित्यंनैमित्तिकंकाम्यंयच्चान्यत्कर्मवैदिक॥ अनधीतस्यवि
प्रस्यसर्वंभवतिनिष्फलं॥ शब्दब्रह्ममयोविष्णुर्वेदःसाक्षाद्धरिःस्मृतः॥ वेदा
ध्ययीततोविप्रःसर्वान्कामानवाप्नुते॥ ॥ इतिश्रीबृहन्नारदीयत्रयोविंशो

ध्यायः॥ ॥२३॥ ॥सूत उवाच॥ ॥वेदग्रहणपर्यंतं शुश्रूषानियते गुरोः॥ अ-
नुज्ञातस्ततस्तेन कुर्यादग्निपरिग्रहं॥ पत्नीं सुगुणां सुकुलोद्भवं॥ द्विजः समुद्व-
हेत्कन्यां सुशीलां धर्मचारिणीं॥ मातृतः पंचमादीनां पितृतः सप्तमीं तथा॥ द्विजः
समुद्वहेत्कन्याः सैमन्यथा गुरुतल्पगः॥ रोगिणीं चैव वृत्ताक्षीं सरोगकुलसं-
भवां॥ अतिकेशामकेशां वा वाचालां नोद्वहेद्बुधः॥ कायस्थां वामनां चैव दी-
र्घदेहां विरूपिणीं॥ न्यूनाधिकांगामुन्मत्तां पिशुनां नोद्वहेद्बुधः॥ स्थूलगुल्फां
दीर्घजंघां तथैव पुरुषाकृतिं श्मश्रुव्यंजनसंयुक्तां विकारीं नोद्वहेद्बुधः॥ वृथाहा-
स्यवतीं चैव सदान्यगृहवासिनीं॥ विवादशीलां भ्रमितां निष्ठुरां नोद्वहेद्बुधः॥ ब- पु॰रा॰
हाशिनीं स्थूलदंतां स्थूलोष्ठीं घर्घरस्वरां॥ अतिकृष्णां रक्तवर्णां धूर्तां नैवोद्वहे- १३३

द्बुधः॥ सदा रोदनशीलां च पांडुवर्णां च कुत्सितां॥ श्वासकासादिसंयुक्तां निद्राशी-
लां च नोद्वहेत्॥ अनर्थभाषिणीं चैव लोकद्वेषपरायणां॥ परापवादनिरतां त-
स्करां नोद्वहेद्बुधः॥ दीर्घनासां च कितवां तनूरुहविभूषितां॥ गर्वितां बकवृ-
त्तिं च सर्वथा नोद्वहेद्बुधः॥ बालभावाद्विज्ञातस्वभावामुद्वहेद्यदि॥ प्रगल्भां
विगुणां ज्ञात्वा सर्वथा तां परित्यजेत्॥ नष्टे पुत्रेषु या नारी निष्ठुरा सर्वदा भवेत्
॥ परानुकूलिनीं चैव सर्वथा तां परित्यजेत्॥ विवाहस्त्वष्टमविधो ब्राह्माद्यामु-
निसत्तमा॥ पूर्वः पूर्वो वरो ज्ञेयः पूर्वाभावे परः परः॥ ब्राह्मादिवस्त्वथा चैवार्षप्राजा-
पत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः॥ ब्राह्मेनैव विवाहे-
न विवाहं द्विजोत्तमः॥ दैवेनाप्यथवा कुर्यात्केचिदार्षं च चक्षते॥ प्राजाप

स्नादयो विप्रा विवाहाः पंचगर्हिताः॥अभावेषु तु पूर्वेषु कुर्यादेव परान्बुधः॥य
ज्ञोपवीतद्वितयं सोत्तरीयं च धारयेत्॥सुवर्णकुंडले चैव धौतवस्त्रद्वयं तथा॥अ
नुलेपनलिप्तांगः कृत्तकेशनखः शुचिः॥धारयेद्वैणवं दंडं सोदकं च कमंडलुं
॥उष्णीषममलं छत्रं पादुके वाप्युपानहौ॥धारयेत्पुष्पमाल्यं च सुगंधः प्रिय
दर्शनः॥नित्यं स्वाध्यायशीलः स्याद्यथाचारः समाचरेत्॥परान्नं नैव भुंजी
त परवादं च वर्जयेत्॥पादेनाक्रमेत्पादं उच्छिष्टं नैव लंघयेत्॥न संहता
भ्यां पाणिभ्यां कंडूयादात्मनः शिरः॥पूज्यं देवालयं चैव नापसव्यं व्रजेद्द्वि
ज॥देवार्चाचमनस्नानव्रतश्राद्धक्रियादिषु॥न भवेन्मुक्तकेशश्च नैकवस्त्रध
रस्तथा॥नारोहेद्दुष्टयानं च शुष्कवादं च वर्जयेत्॥अन्यस्त्रियं न गच्छेच्च द्यू

तं च परिवर्जयेत्॥नापसव्यं व्रजेद्विप्रान्अश्वत्थं च चतुष्पथं॥असूयामत्सरं
चैव दिवास्वापं च वर्जयेत्॥न वदेत्परपापानि स्वपुण्यं नैव कीर्तयेत्॥स्ववय
नक्षत्रं मानं चैवाभिगोपयेत्॥न दुर्जनैः सह वसेन्नाशास्त्रं शृणुयात्तथा॥आ
सर्वद्यूतगीतेषु द्विजस्तु न मतिं चरेत्॥आर्द्रास्थि च तथोच्छिष्टं श्वस्पृष्टं च पतितं त
था॥सर्पं च निषजं स्पृष्ट्वा सचैलं स्नानमाचरेत्॥चितिं चितिकाष्ठं च यूपं चंडा
लमेव च॥स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्॥दीपखट्वातनच्छाया केश
वस्त्रघटोदकं॥अजमार्जाररेणुश्च हंति पुण्यं दिवाकृतं॥शूर्पवातं प्रेतधूमं तथा शू
द्रान्नभोजनं॥वृषलीपतिसंगं च दूरतः परिवर्जयेत्॥असच्छास्त्राभिगमनं खाद
नं नखकेशयोः॥तथैव नग्नशयनं दूरतः परिवर्जयेत्॥गामश्वत्थं समं चै

बृहन्नार० वतथैव च चतुष्पथं॥ देवतायतनं चैव नापसव्यं व्रजेद्द्विजः॥ शिराभ्यंगावसिष्टेन तै
१३५ लेनांगं न लेपयेत्॥ तांबूलमशुचिर्नाद्यात्तथासुप्तं न बोधयेत्॥ नाशुद्धोग्निं परिचरे
त्पूज्यते गुरुदेवताः॥ न वामहस्तेनैकेन पिबेद्वक्त्रेण वा जलं॥ नातिक्रमेद्गुरोः छाया
तदाज्ञां च मुनीश्वराः॥ न निंद्याद्योगिनो विप्रा न व्रतिनोपि यतीस्तथा॥ परस्परस्य
मर्माणि कदापि न वदेद्द्विजाः॥ दर्शं च पौर्णमास्यां च यागं कुर्याद्यथाविधि॥ उपास
नं च होमं वै च सायं प्रातर्द्विजादिभिः॥ उपासनपरित्यागी सुरापीलुच्यते बुधैः॥ अ
यने विषुवे चैव युगादिषु च त्रिष्वपि॥ दर्शे च प्रेतपक्षे च श्राद्धं कुर्याद्गृही द्विजाः॥ मन्वा-
दिषु मृताहे च अष्टकादिषु सत्तमाः॥ नवे धान्ये समायाते गृही श्राद्धं समाचरेत्॥ श्रो पु॰ रा॰
त्रिये गृहमायाते ग्रहणे चंद्रसूर्ययोः॥ पुण्यक्षेत्रेषु तीर्थेषु गृही श्राद्धं समाचरेत् १३५

यज्ञो दानं तपो होमः स्वाध्यायपितृतर्पणं॥ वृथा भवति विप्रेंद्राः ऊर्द्ध्वपुंड्रं विना कृ
तं॥ ऊर्द्ध्वपुंड्रं च तुलसीं श्राद्धे नेच्छंति केचन॥ वृद्धाचारः परिग्राह्यो तस्माच्छ्रेयोभि
भिर्द्विजैः॥ इत्येवमादयो धर्माः स्मृतिमार्गप्रचोदिताः॥ कार्या द्विजातिभिः सम्यक्
सर्वकामफलप्रदाः॥ सदाचारपरा ये तु तेषां विष्णुः प्रसीदति॥ विष्णोः प्रसन्नतां
याति किमसाध्यं द्विजोत्तमाः॥ ॥ इति श्रीबृहन्नारदीये चतुर्विंशोध्यायः॥ ॥
॥२४॥ ॥सूत उवाच॥ ॥गृहस्थस्य सदाचारं वक्ष्यामि द्विजसत्तमाः॥ कुर्वतां
सर्वपापानि नश्यंत्येव न संशयः॥१॥ ब्राह्मे मुहूर्ते उत्थाय पुरुषार्थाविरोधिनीं॥ वृ
त्तिं संचिंतयेद्विप्राः कृतकेशप्रसाधनः॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्रं उदङ्मुखः
॥ कुर्यान्मूत्रपुरीषे तु रात्रौ च दक्षिणामुखः॥ शिरः प्रावृत्य वस्त्रेण अंतर्द्धाय तृणैर्म-

बृहन्ना० द्रौ॥ वहन्नसूत्रं तु कर्णे वै तावन्मौनी भवेद्द्विजः॥ पथि गोष्ठे नदीतीरे तटाके कूपसन्नि-
१३६ धौ॥ तथा वृक्षच्छायायां कान्तारे वह्निसन्निधौ॥ देवालये तथोद्याने कृष्टभूमौ चतु-
ष्पथे॥ ब्राह्मणानां समीपे च तथा गोगुरुयोषितां॥ तुषांगारकपालेषु जलमध्ये तथै-
व च॥ एवमादिषु देशेषु मलमूत्रं न कारयेत्॥ शौचे यत्नः सदा कार्यः शौचमूलो
द्विजः स्मृतः॥ शौचाचारविहीनस्य समस्तं कर्म निःफलं॥ शौचं तु द्विविधं प्रोक्तं बा-
ह्यमाभ्यन्तरं तथा॥ मृज्जलाभ्यां बहिःशुद्धिर्भावशुद्धिस्तथान्तरा॥ गृहीतशिश्नश्चोत्थाय
शौचार्थं मृत्तिकां हरेत्॥ गंधलेपक्षयकरं शौचं कुर्यात्प्रयत्नतः॥ शुचिदेशे तु शौचा-
र्थं मृत्तिकां गृहेत्॥ न मूषकादिखनितां हलोत्कृष्टां तथैव च॥ वापीकूपतटाकेषु नाहरेद्बाह्यमृ- पू०रा०
त्तिकां॥ शौचं कुर्यात्प्रयत्नेन छायायां तज्जीजमृदं॥ लिंगे मृदेका दातव्या तिस्रो वामे द्वयोर्द्वयोः १३६

अपाने पंच वामे तु दश सप्त तयोर्भयोः॥ तिस्रस्तिस्रः प्रदातव्याः पादयोर्मृत्तिकाः पृथक्॥
एवं शौचं प्रकुर्वीत गंधलेपापनुत्तये॥ एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं तु
वनस्थानां यतीनां तु चतुर्गुणं॥ स्वग्रामे पूर्णमाचारं पथ्यर्द्धं मुनिसत्तमाः॥ आतुरे नियमं नास्ति म-
हापदि तथैव च॥ गंधलेपक्षयकारं शौचं कुर्याद्विचक्षणः॥ स्त्रीणामनुपनीतानां गंधलेपक्ष-
यावधि॥ व्रतस्थानां च सर्वेषां यतिवच्छौचमिष्यते॥ विधवानां च विप्रेन्द्राः एवं शौचं प्रकीर्त्तितं॥ ए-
वं शौचं तु निर्वर्त्य पश्चाद्द्वे सुसमाहितः॥ प्रागुदङ्मुखो वापि आचामेत्प्रयतो द्विजः॥ त्रिश्च-
तुर्वा पिबेदापो वेदापो गंधफेनादिवर्जिताः॥ द्विमर्ज्यक्षकपालं च तलेनोष्ठौ च सत्त-
माः॥ तर्जन्यंगुष्ठयोगेन नासारंध्रे द्वयं स्पृशेत्॥ अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे
यथाक्रमं॥ कनिष्ठांगुष्ठयोगेन नाभिदेशं स्पृशेद्द्विजाः॥ तलेनोरस्थलं चैव अं-

बृहन्नार०
१३७

गुल्फगैः शिरः स्पृशेत्॥ तलेनांगुल्यगैर्वा स्पृशेदंसौ विचक्षणः॥ एवमाचम्य वि
प्रेंद्राः शुद्धिमाप्नोत्यनुत्तमां॥ ततः स्नानं प्रकुर्वीत मार्जनं जलतर्पणं॥ तथा संध्या
मुपासीत गायत्र्यर्घ्यं रवौ क्षिपेत्॥ गायत्रीं तु जपेत्स्थित्वा तिष्ठन्नासूर्यदर्शनात्
॥ तथैव सायमासीनो जपेदाऋक्षदर्शनात्॥ उपास्य संध्यां च मध्याह्ने क्षिपे
दर्घ्यं च पूर्ववत् गायत्रीं च जपेत्सम्यक् तिष्ठन्नासीन एव वा॥ प्रातर्मध्यं दिने चि
वगृहस्थः स्नानमाचरेत्॥ ब्रह्मयज्ञं प्रकुर्वीत दर्भपाणिर्मुनीश्वराः॥ द्विजोदि
तानि कर्माणि प्रमादादि कृतानि चेत्॥ शर्वर्याः प्रथमे यामे तानि कुर्याद्यथा
क्रमं॥ नोपास्ते यो द्विजः संध्यां धूर्त्तो मर्त्योऽप्यनापदि॥ पाषंडः स हि विज्ञेयः सर्व पूरा०
वर्णबहिःकृतः॥ यस्तु संध्यादिकर्माणि कूटयुक्त्या विरागतः॥ परित्यजति तं १३७

विद्यान्महापातकिनां वरं॥ यद्विजाञ्जनिभाषंते त्यक्तसंध्यादिकर्म्मिणं॥ ते या
ति नरकान्घोरान्यावच्चंद्रतारकं॥ देवार्चनं ततः कुर्याद्विश्वदेवं यथाविधिः
॥ अयांतमतिथिं सम्यग्गत्वाद्यैश्च प्रपूजयेत्॥ वक्तव्या मधुरा वाणी अतिथिष्वाग
तेषु वि॥ जलान्नकंदमूलैर्वा गृहदानेन वार्चयेत्॥ अतिथिर्यस्य भग्नाशो
गृहात्प्रतिनिवर्त्तते॥ स तस्मै दुःकृतं दत्वा पुण्यमादाय गच्छति॥ अज्ञातगो
त्रनामानमन्यग्रामादुपागतं॥ विपश्चितोतिथिं प्राहुर्विष्णुवत्तं प्रपूजयेत्॥
स्वग्रामवासिनं त्वेकं श्रोत्रियं विष्णुतत्परं॥ अन्नाद्यैः प्रत्यहं विप्रा उद्दिश्यापि
रन्नयजेत्॥ पंचयज्ञपरित्यागी ब्रह्महेत्युच्यते बुधैः॥ कुर्यादहरहस्तस्मात्पंच
महायज्ञान्नतः॥ देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च॥ नृयज्ञो ब्रह्मयज्ञश्च

पंचयज्ञाः प्रकीर्तिताः ॥ भृत्यमित्रादिसंयुक्तः स्वयं भुंजीत वाग्यतः ॥ द्विजो नाभो
ज्यमश्नीयात् पात्रांते वपरित्यजेत् ॥ संस्थाप्य ग्रासने पादौ वस्त्रार्द्धपरिधायवे
॥ मुखेन धमितं भुक्त्वा सुरापीत्युच्यते बुधैः ॥ स्वादितार्द्धं पुनः स्वादेत मोदका
नि फलानि वा ॥ ग्रासशेषं न चाश्नीयात् पीतशेषं पिबेन्न च ॥ एक एव तु पात्रे
विभोजनं द्वौ न कारयेत् ॥ नोच्छिष्टं कस्यचिद्दद्यात् उच्छिष्टं भोजयेन्न च ॥ अ
त एव विकं भुंजीत नान्येन च कदाचन ॥ भुंजीनस्य गृहस्थस्य सिद्धेसिद्धेऽपि
तामहाः ॥ उच्छिष्टं च न भुंजीत अतोऽन्यन्न कदाचन ॥ प्रत्य ॥ क्षलवणंविवगो
मांसाशी निगद्यते ॥ आपोशाने वाचमने पेयद्रव्येषु च द्विजः ॥ शब्दं न कार
येद्विप्राः कुर्याच्चेन्नारकी भवेत् ॥ पथ्यमन्नं प्रभुंजीत वाग्यतोऽन्नमकुत्सयन्

त् ॥ ततश्चाचम्य विप्रेंद्राः शास्त्रचिंतापरो भवेत् ॥ रात्रावपि यथाशक्त्या शयना
सनभोजनैः ॥ कंदमूलफलैर्वापि आयांतमतिथिं यजेत् ॥ एवं गृही सदाचारं
कुर्यात्प्रतिदिनं बुधाः ॥ यथाचारपरित्यागी प्रायश्चित्ती भवेद्ध्रुवं ॥ ऋषितां
स्वतनुं दृष्ट्वा पलिताद्यैश्च सत्तमाः ॥ पुत्रेषु भार्यां निःक्षिप्य वनं गच्छेत्सहैव वा ॥
भवेत्त्रिषवणस्नायी नखश्मश्रुजटाधरः ॥ अधःशायी ब्रह्मचारी पंचयज्ञपरा
यणः ॥ फलमूलाशनानि संस्वाध्यायनिरतस्तथा ॥ दयावान् सर्वभूतेषु ना
रायणपरायणः ॥ वर्जयेद्ग्रामजातानि पुष्पाणि च फलानि च ॥ अष्टौ ग्रासां
श्च भुंजीत न कुर्याद्रात्रिभोजनं ॥ अभ्यंगं वन्यतैलेन वानप्रस्थः समाचरेत् ॥
व्यवायं वर्जयेद्यत्नैव निद्रालस्यं च वर्जयेत् ॥ मृषावादं परिवादं मिथ्यावादं च वर्ज

येत्॥ शंखचक्रगदापाणिं नित्यं नारायणं स्मरेत्॥ वानप्रस्थः प्रकुर्वीत नूतनश्चां
द्रायणादिकं॥ सहेत शीतवातादि वह्निं परिचरेत्सदा॥ यदा मनसि वैराग्यं जा-
तं सर्वेषु वस्तुषु॥ तदैव सन्न्यसेद्विद्वानन्यथा पतितो भवेत्॥ वेदांताभ्यास
निरतः शांतो दांतो जितेंद्रियः॥ निर्द्वंद्वो निरहंकारो निर्ममः सर्वदा भवेत्॥ श
मादिगुणसंयुक्तः कामक्रोधविवर्जितः॥ नग्नो वा जीर्णकौपीनो भवेन्मुंडो
यतिर्द्विजाः॥ समः शत्रौ च मित्रे च तथा मानापमानयोः॥ एकरात्रं वसेद्ग्रामे त्रि
रात्रं नगरे तथा॥ भैक्षेण वर्त्तयन्नित्यं नैकान्नी च भवेद्यतिः॥ अनिंदितद्वि
जागेहे व्यंगारे भुक्तवर्जिते॥ विवादरहिते चैव भिक्षार्थं पर्यटेद्यतिः॥ भवे
त्रिषवणस्नायी नारायणपरायणः॥ जपेच्च प्रणवं नित्यं यतात्मा विजिते

न्द्रियः॥ एकान्नादी भवेद्यस्तु कदाचिल्लंपटो यतिः॥ तस्यैव निष्कृतिर्नास्ति प्राय
श्चित्तायुतैरपि॥ यदि विप्रा यतिर्लोभात्प्रहृष्टस्तरुषो भवेत्॥ स चंडालसमो
ज्ञेयो वर्णाश्रमविगर्हितः॥ आत्मानं चिंतयेद्देवं नारायणमनामयं॥ निर्द्वंद्व
निर्ममं शांतं मायातीतमनामयं॥ अव्ययं च परिपूर्णं च सदानंदैकविग्रहं॥ ज्ञा
नस्वरूपममलं परं ज्योतिः सनातनं॥ अविकारमनाद्यंतं जगच्चैतन्यका
रणं निर्गुणं परं ध्यायेदात्मानं परमात्मनं॥ पठेदुपनिषद्वाक्यं वेदांतार्थां
श्च चिंतयेत्॥ सहस्रशिरसं देवं सदा ध्यायेज्जितेंद्रियः॥ एवं ध्यानपरो य-
स्तु यतिर्विगतमत्सरः॥ स याति परमानंदं परं ज्योतिः सनातनं॥ इत्येवमा-
श्रमाचारान्यः करोति द्विजः क्रमात्॥ स याति परमं स्थानं यत्र गत्वा न शो

चति॥वर्णाश्रमाचाररताः सर्वे पापविमोचिताः॥नराः सर्वे समायांति तद्विष्णोः प
रमंपदं॥ ॥इतिश्रीबृहन्नारदीये पंचविंशोध्यायः॥ ॥२५॥सूतउवाच॥ ॥
शृणुध्वमृषयः सर्वे श्राद्धस्य विधिरुत्तमं॥यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र सं
शयः॥१॥विप्रः क्षयाहपूर्वेद्युः स्नात्वाकाक्रांतो भवेत्॥अधःशायी ब्रह्मचारी
निशि विप्रान्निमंत्रयेत्॥दंतधावनतांबूलेतिलाभ्यंगं तथैव च॥रत्यौषधप
रान्नानि श्राद्धकर्त्ता विवर्जयेत्॥३॥अध्वानं कलहं क्रोधं व्यवायं च धुरं तथा
॥श्राद्धकर्त्ता च भोक्ता च दिवास्वापं च वर्जयेत्॥श्राद्धे निमंत्रितो यस्तु व्यवायं
कुरुते यदि॥ब्रह्महत्यामवाप्नोति नरकं चोपपद्यते॥श्राद्धे नियोजयेद्विप्रं

श्रोत्रियं विष्णुतत्परं॥यथास्वाचारनिरतं संतं सत्कुलोद्भवं॥रागद्वे

षविहीनं च पुराणार्थविशारदं॥देवपूजारतं चैव स्मृतेरर्थविशारदं॥वेदां
ततत्वसंपन्नं सर्वलोकहितेरतं॥कृतज्ञं गुणसंपन्नं गुरुशुश्रूषणे रतं॥
परोपदेशनिरतं सच्छास्त्रकथनेतथा॥एते नियोजितव्या वै श्राद्धे विप्रा
मुनीश्वराः॥सूतउवाच॥ ॥श्राद्धे वर्ज्यान्प्रवक्ष्यामि शृणुध्वं गदतो मम॥न्यू
नांगश्चाधिकांगश्च कापस्थो रोगिणस्तथा॥कुष्ठी च कुनखी चैव लंबकर्णः
क्षतव्रतः॥नक्षत्रपाठजीवी च तथा च शवदाहकः॥कुवादी परिवेत्ता च त
था देवलकः खलः॥वृषलीसूतिपोष्टा च वृषलीपतिरेव च॥कुंडश्च गोलक
श्चैव मंत्रविक्रयिणस्तथा॥गायकाः काव्यकर्त्तारो भिषक्शास्त्रोपजीविनः॥वेद
निंदापरश्चैव विप्रनिंदापरस्तथा॥निमंत्रांजोपसेवी च कृतघ्नः कितवस्तथा

॥ सुरापानपरश्चैव द्यूतासवपरायणाः ॥ मिथ्याभिवादिनश्चैव ग्रामारण्यप्रदा
हकाः ॥ न चातिथ्यपरश्चैव अयाज्यानां च याजकः ॥ दंभाचारो ह्यसंतुष्टोऽन्य
स्त्रीधनतत्परः ॥ विष्णुभक्तिविहीनश्च शिवभक्तिपराङ्मुखः ॥ वेदविक्रयिणश्चैव
व्रतविक्रयिणस्तथा ॥ स्मृतिविक्रयिणश्चैव पश्चापि रसविक्रयी ॥ कूटयुक्ति
रतश्चैव श्राद्धे वर्ज्याः प्रयत्नतः ॥ निमंत्रयीत पूर्वेद्युः तस्मिन्नेव दिने तथा ॥ नि
मंत्रितो भवेद्विप्रो ब्रह्मचारी जितेंद्रियः ॥ ततः प्रातः समुत्थाय कल्यं कर्म्म समा
रभेद्द्विजानुकूले कुतपसंज्ञिते ॥ दिवसस्याष्टमे भागे यदा मंदायते रविः ॥ स का
लः कुतपो नाम पितॄणामतिवल्लभः ॥ अपराह्णः पितॄणां तु दत्तः कालः स्वयं
भुवा ॥ तत्काल एव दातव्यं तस्माद्विप्राः द्विजोत्तमैः ॥ यत्कव्यं दीयते विप्र रका

ले मुनिसत्तम ॥ राक्षसं तद्भवेत्तेयं पितॄणां नोपसर्पति ॥ कव्यं प्रदत्तं सायाह्ने राक्ष
सं तनैद्वविर्नवेत् ॥ दाता नरकमाप्नोति भोक्ता च नरकं व्रजेत् ॥ क्षयाहस्य तिथि
र्यातु यदि खंडतिथिर्भवेत् ॥ व्याप्तापराह्निका यातु श्राद्धं कार्यं विजानता ॥ क्ष
याहस्य तिथिर्यातु अपराह्णद्वये यदि ॥ पूर्वा क्षये तु कर्त्तव्या वृद्धौ कार्या तथोत्त
रा ॥ मुहूर्त्तद्वितयं पूर्वदिने स्यादपरेऽहनि ॥ तिथिः सायाह्नगा तत्र परा कव्यस्य
विश्रुता ॥ केचित्पूर्वदिनं प्राहुर्मुहूर्त्तद्वितये सति ॥ न तन्मतं हि सर्वेषां कव्यदी
ने मुनीश्वराः ॥ निमंत्रितेषु विप्रेषु मिलितेषु द्विजेषु द्विजोत्तमाः ॥ प्रायश्चित्तवि
शुद्धात्मा तेभ्योऽनुज्ञां समाहरेत् ॥ उक्तो च विश्वदेवार्थं पित्रर्थे त्रीन्यथाविधिः ॥
देवतार्थे च पित्रर्थे मकैकं वानिमंत्रयेत् ॥ श्राद्धार्थं समनुज्ञातो मंडलं कारये

ह०नारा०
१४२

हूयं॥ब्राह्मणस्यत्रिकोणंचक्षत्रियस्यशिवस्यवर्तुलंज्ञेयंशूद्रस्यात्सुलक्षणंनवे
त॥ब्राह्मणानाममन्त्रावेत्तुत्वान्तरंपुत्रमेववा॥आत्मानंवानियुंजीतनविघ्नंवेदव
र्जितं॥प्रक्षाल्यविप्रपादांश्चआचांतानुपवेश्यच॥यथावद्दर्शनंकुर्यात्परं
नारायणंप्रभुं॥ब्राह्मणानांचमध्येचद्वारदेशेचसत्तमाः॥अपहतादृशूचा
कर्त्राअनुविकिरेत्तिलान्॥यविदीर्णैश्चविश्वेषांदेवानामिदमासनं॥इत्येतिमं
योदद्यात्स्वदेवेक्षणइतिक्षणं॥अक्षय्यासनयोःषष्ठीद्वितीयावाहनेतथा॥
अन्नदानेचतुर्थीस्यात्शेषाःसंबुद्धयःस्मृताः॥आसाद्यपात्रद्वितयंव
र्णशाखासमन्वितं॥तत्पात्रेसेचयेत्तोयंशन्नोदेवीरुस्वाद्विजः॥यवोसीति पू०रा०
यवान्क्षिप्त्वागंधपुष्पैःप्रपूज्यच॥आवाहयेत्ततोदेवान्विश्वेदेवासइत्य १४२

चा॥यादिव्याइतिमंत्रेणदद्यादर्घ्यंसमाहितः॥गंधैश्चपुष्पधूपैश्चदीपैर्वस्त्रै
यजेत्ततः॥देविश्वसमनुज्ञातोयजेत्पितृगणंतथा॥तिलसंयुक्तदर्भैश्चदद्यात्तेषा
यथासनं॥पात्राण्यासादयेत्त्रीणिअर्घ्यार्थंपूर्ववद्द्विजाः॥शन्नोदेव्याजलंक्षिप्त्वा
तिलोसीतितिलंक्षिपेत्॥उशंतस्त्वेत्यावाह्यपितॄन्विप्रःसमाहितः॥यादिव्याइ
तिमंत्रेणदद्यादर्घ्यंचपूर्ववत्॥गंधैश्चपुष्पैस्तैश्चधूपदीपैश्चसत्तमाः॥वासो
भिर्भूषणैश्चैवयथावित्तंसमर्चयेत्॥ततोन्नमासमादायघृतयुक्तंविचक्ष
णः॥अग्नौकरिष्यइत्युक्त्वातेभ्योनुज्ञांसमाहरेत्॥ग्रंथांतरात्॥मखाःसर्वत्रा
नवेद्यापिंडाग्नौचविवर्जयेत्॥यथामघंतथामाखनिषिद्धाश्चाग्निपिंडयोः॥
मातामहेत्वयोदद्यादग्नौकारणआहुती॥निराग्नाःपितरास्तस्यापिशाचं

वृ॰ना॰र॰ श्राद्धमुच्यते॥करवै करवाणीति वा।चव्यो विब्राह्मणो द्विजः॥कुरुष्व क्रियतां चे
१४२ ति कुर्वन्नेव हरेद्द्विः॥अपासनाग्निमाधाय स्वगृह्योक्त विधानतः॥सोमय
पित्र्मते स्वधा नम इति सत्तमाः॥अग्नये कव्यवाहनाय स्वधा नम इत्येवच
॥स्वाहांतेपि नापि वा विप्राञ्जुहुयात्पित्र्यज्ञवत्।अभ्यामेवाकृतिभ्यां तु पि
तरस्तृप्तिमाप्नुयुः॥आग्न्याभावे तु विप्रस्य पाणौ होमो विधीयते।यथाचारं प्रकुर्वीत पा
णावग्नौ यथा द्विजः॥नष्टाग्निर्दूरगो वापि चेत्पार्वणे समुपस्थिते॥संधायाग्निं ततः का
र्यं कृत्वा तं विसृजेत्कृती॥यद्यग्निर्दूरगो विप्राः पार्वणे समुपस्थिते॥भ्रातृभिः कार
येच्छ्राद्धं साग्निकैर्विधिवद्द्विजः॥क्षयाहदिवसे प्राप्ते स्वस्याग्निर्दूरगो यदि॥त
त्पिवं भ्रातरस्तत्र लौकिकाग्नाविति।स्थितिः॥अपासनाग्नौ दूरस्थे समीपे भ्रात पू॰रा॰ १४३

रि स्थिते॥यद्यग्नौ जुहुयाद्वापि पाणौ वा स हि पातकी॥अपासनाग्नौ दूरस्थे केचिदि
च्छंति सत्तमाः॥पाणौ च तस्य होतव्यमिति तन्न समंजसं॥प्राचीनावीतिना होमः॥का
र्योग्नौ द्विजसत्तमाः॥तच्छेषं विप्रपात्रेषु विकिरेत्संस्मरन्हरिः॥नक्षेत्रो ज्येष्ठल
क्षेश्वरवाद्यैर्विप्रानुप्रपूरयेत्॥दत्वान्नं पृथिवी पात्रमिति पात्राभिमंत्रणं॥कृत्वेदं
विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत्॥सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं॥ज
प्त्वा यथासुखं वाच्यं तु जीरं स्तैपि वाग्यतः॥अन्नत्यागं ततः कार्यमुच्चयेत्तत्र समा
हिताः॥आगच्छंतु महाभागा विश्वेदेवा महाबलाः॥ये यत्र विहिताः श्राद्धे सावधाना
भवंतु ते॥इति संप्रार्थ्य देवान्ये देवाः साउवाचवे॥तथा संप्रार्थ्य पितॄन्ये च
हेति रुचापि नृन्॥अमूर्तानां समूर्तानां पितॄणां दीप्ततेजसां॥नमस्यामि सदा ते

ह.र.ना.० षां ध्यायिनां योगचक्षुषां ॥ एवं पितॄन् नमस्कृत्वा नारायणपरायणः ॥ दत्तं द विश्व
१४४ तत्कर्म विप्रवे च समर्पयेत् ॥ ततस्ते ब्राह्मणाः सर्वे भुंजीरन् वाग्यता द्विजाः ॥ हस
ते वदते यश्च राक्षसं तद्भवेद्धविः ॥ यथाचारं प्रदेयं च मधुमांसादिभिस्तथा ॥ पाका
दीन्न प्रशंसेरन् ॥ वाग्यताध्यतनात्तनाः ॥ यदि पात्रं त्यजेद्यस्तु ब्राह्मणः श्राद्धयोजि
तः ॥ श्राद्धहंता स विज्ञेयो नरकायोपपद्यते ॥ भुंजानेषु जन्मोन्यं स्पृष्टं तेयदि ॥
तदन्नमत्यजन् भुक्त्वा गायत्र्याष्टशतं जपेत् ॥ भुज्यमानेषु विप्रेषु कर्त्ता श्राद्धपरा
यणः ॥ स्मरन्नारायणं देवमनंतमपराजितं ॥ रक्षोघ्नान्वैष्णवानां चापेत्यकांश्च
विशेषतः ॥ जपेद्वा पौरुषं सूक्तं नाचिकेतत्रयं तथा ॥ सामान्यपि च सूक्तेन वेदपु पू.रा.
एपकथास्तथा इतिहासपुराणानि धर्मशास्त्राणि चैव हि ॥ भुंजीरन् ब्राह्मणा ४४

यावत्तावदेतान् जपेद्द्विजाः ॥ ब्राह्मणेषु च भुक्तेषु विकिरन्निक्षिपेत्तथा ॥ शेषमन्नं च
देवेचैव मधुसूक्तं च वै जपेत् ॥ स्वयं च पादौ प्रक्षाल्य सम्यगाचम्य पंडिताः ॥ आचांते
षु च विप्रेषु पिंडनिर्वापयेत्ततः ॥ स्वस्तिवाचनकं कुर्यात् अक्षय्योदकमेव च ॥ द
त्त्वा समाहितः कुर्यात्तथा गोत्राभिवंदनं ॥ उच्चाल्य पित्र्यपात्रं तु स्वस्ति कुर्वीति ये
द्विजाः ॥ वत्सरं पितरस्तेषां भवत्युच्छिष्टभोजनाः ॥ दातारो नोभिवर्द्धतामित्याद्यैः
स्मृतिभाषितैः ॥ आशीर्वाचाप्यनेनेत्थं नमस्कारं चरेत्ततः दद्याच्च दक्षिणां शक्त्या
तांबूलं गंधसंयुतं ॥ भुक्तपात्रमथोत्तीय स्वधाकारमुदीरयेत् ॥ वाजेवाजेति च रु
पितॄन्देवान्विसर्जयेत् ॥ मोक्षाच्च श्राद्धकृत्तस्यां रजन्यां मैथुनं त्यजेत् ॥ तथा स्वा
ध्यायमध्वानं प्रयत्नेन परित्यजेत् ॥ उद्धगम्याद्वरश्चैव विहीनश्च धनैस्तथा ॥ आ

बृहना॰ मश्राद्धं प्रकुर्वीत द्रव्याभावस्त्वाश्चेत् शाकादद्याच्चणं गवां॥ स्नात्वा च विधिवद्विप्राः कुर्या
१४५ द्यातिलतर्पणं॥ अथवा रोदनं कुर्यात् उच्चैर्विजने वने॥ दरिद्रोहं महापापी वद
न्निति विचक्षणः॥ परेद्युश्राद्धकृन्मर्त्यो यानेतर्पयते पितॄन्॥ तत्कुलं नाशमाप्नोति
ब्रह्महत्यां च विंदति॥ श्राद्धं कुर्वंति ये मर्त्याः श्राद्धावंतो मुनीश्वराः॥ न तस्य संततिछे
दः परलोके सुखाप्नवेत्॥ पितॄन् यजंति ये श्राद्धे तत्र विष्णुः प्रपूजितः॥ तस्मिंस्तु हृष्टे ज
गन्नाथे सर्वास्तुष्यंति देवताः॥ पितरो देवताश्चैव गंधर्वाप्सरसस्तथा॥ यक्षाश्च सि
द्धा मनुजा हरिरेव सनातनः॥ विप्राः पदस्ति यदस्ति दृश्यं चादृश्यमेव च॥ सर्वं विष्णुम
यं ज्ञेयं तस्मादन्यं न विद्यते॥ आधारभूतो विश्वस्य सर्वभूतात्मकोव्ययः॥ अनौ पूरां:
पम्यस्वभावश्च भगवान् हव्यकव्यभुक्॥ परब्रह्माभिधेयोपि एक एव जनार्दनः॥ १४५

कर्ता कारयिता चैव सर्वं विष्णुः सनातनः॥ इत्येतद्वो मुनिश्रेष्ठाः श्राद्धस्य विधिरुत्तमः
॥ कथितः कुर्वतामेव पापशांतिर्न विद्यति॥ य इदं पठते नित्यं श्राद्धकाले द्विजो
त्तमाः॥ पितरस्तस्य तृप्यंति संतुष्यति जनार्दनः॥ ॥इति श्रीबृहन्नारदीये षड्विंशो
ध्यायः॥ ॥२६॥ ॥सूत उवाच॥ ॥तिथीनां निर्णयं वक्ष्ये प्रायश्चित्तविधिं तथा॥
शृणुध्वं सर्वकर्म्माणां सिद्धिर्येन प्रजायते॥ श्रौतस्मार्त्तव्रतं दानं यच्चान्यत्कर्म वैदि
कं॥ अनिर्णीतासु तिथिषु न किंचित्फलति द्विजाः॥ एकादश्यष्टमी षष्ठी पौर्णमा
सी चतुर्दशी॥ अमावास्या तृतीया च उपवासव्रतादिषु॥ परविद्धाः प्रशस्ताः स्युः
र्न ग्राह्याः पूर्वसंयुताः॥ नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी॥ दशम्यैकादशी
विद्धा नोपोष्या स्यात्कदाचन॥ दर्शं चायोसौर्णमासी च सप्तमी पितृवासरं॥ पूर्ववि

हृत्सार॰ १४६ द्वादशीमकुर्वाणो॥ नरकं याति मानवः॥ कृष्णपक्षे पूर्वविद्धा ह्यष्टमी च चतुर्दशी॥ प्रश॰
स्ताके चिदाकुर्वन्तीयायां नवमी तथा॥ व्रतादीनां तु सर्वेषां शुक्लपक्षो विशिष्यते
॥ अपराह्णं च पूर्वाह्णं ग्राह्यं श्रेष्ठतरं यतः॥ असंभवे व्रतादीनां यदि पूर्वाह्णिकी ति॰
थिः॥ मुहूर्त्तद्वितयं ग्राह्यं भगवत्युदिते रवौ॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्र
ते तथा॥ उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः॥ तिथिर्नक्षत्रसंयोगाविहि
तौ विश्वकर्म्मणि॥ प्रदोषव्यापिनी ग्राह्यान्यथा वितथं भवेत्॥ अर्द्धरात्रादधो याउ
नक्षत्रव्यापिनी तिथिः॥ सिवग्राह्या मुनिश्रेष्ठा नक्षत्रविहितव्रते॥ अर्द्धद्वये समस्या
तां नक्षत्रं च तिथिर्यदि॥ क्षये पूर्वे प्रशस्ता स्याद्वृद्धौ कार्या तथोत्तरा॥ अर्द्धरात्रद्वये पूरा:
व्याप्ता तिथिनक्षत्रसंयुता॥ ह्रासवृद्धिविशेषस्याच्चेतु ग्राह्या पूर्वापरथवा॥ ज्येष्ठसं १४६

मिश्रितो मूलो रोहिणी वह्निसंयुता॥ मित्रेण संयुता ज्येष्ठा संतानादेवनाशिनी॥ त
तस्मात्सु तिथयः पुण्या कर्मानुष्ठानतो दिवा॥ रात्रिव्रतेषु सर्वेषु रात्रियोगो विशिष्य
ते॥ तिथिर्नक्षत्रयोगेन या पुण्या परिकीर्त्तिता॥ तस्मात्तु यत्कृतं कार्यं सिवग्राह्या वि
चक्षणैः॥ उदयाव्यापिनी ग्राह्या श्रवणद्वादशी तिथिः॥ सूर्येन्दुग्रहणं यावत्ता
वद्ग्राह्या जपादिषु॥ संक्रान्तिषु तु सर्वासु पुण्यकालं निगद्यते॥ स्नानदानजपा॰
दीनां कुर्वतामक्षयं फलं॥ तत्र विकर्कटौ ज्ञेयो दक्षिणायनसंक्रमः॥ पूर्वतो द्वा
दिका त्रिंशत् पुण्यकालं विदुर्बुधाः॥ वृषभे वृश्चिके चैव सिंहे कुंभे तथैव च॥ पूर्व
मष्टमुहूर्त्तं तु ग्राह्यं स्नानजपादिषु॥ तुलायां चैव मेषे च पूर्वतः परतस्तथा॥ ज्ञेया
दशैव घटिका दत्तस्याक्षयकारकाः॥ कन्यायां मिथुने चैव मीने धनुषि च द्विजाः

ब्रह्मा॰ ॥घटिकाःषोडशज्ञेयापरतःपुण्यदायकाः॥मकरंसंक्रमंप्राकुरुत्तरांयनसंज्ञितं॥प
१४७ रात्रिंशाच्चघटिकाश्चत्वारिंशाच्चपूर्वतः॥आदित्यशीतकिरणौग्रस्तावंतगतौयदि॥
स्नात्वाभुंजीतविप्रेंद्रः परेद्युःशुद्धमंडलं॥दृष्टचंद्रासिनीवालीनष्टचंद्राकुहूःस्मृ
ता॥अमावास्याद्विधाप्रोक्ताविद्धाद्विधमेलिप्युतिः॥सिनीवालीद्विजैर्ग्राह्यासाग्नि
कैःश्राद्धकर्मणि॥कुहूःशूद्रैस्तथास्त्रीभिःरपिचानग्निकैस्तथा॥अपराह्णद्वय
व्यापिन्यमावास्यातिथिर्यदि॥क्षयेपूर्वातुकर्त्तव्यावृद्धौकार्यातथोत्तरा॥भूत
विद्धेतिविख्यातासद्भिःशास्त्रविशारदैः॥अस्तंगतेस्तदुपरेद्युर्नोपरेद्युर्नोपराह्णि
का॥तत्रग्राह्यासिनीवालीसायाह्नव्यापिनीतिथिः॥अर्वाचीनक्षयेचैवसा पू॰रा॰
याह्नव्यापिनीतथा॥सिनीवालीपरिग्राह्यासर्वथाश्राद्धकर्मणि॥अस्तंगतेतिथिद १४७

द्वौतुभूतविद्धंपरित्यजेत्॥ग्राह्यास्यादपराह्णस्थाकुऽहूःपैत्र्यककर्म्मणि॥मध्याह्न
व्याह्नितयेप्राप्ताअमावास्यातिथिर्यदि॥तत्रेच्छयाचसंग्राह्यापूर्वावाथपराथवा॥स
र्वैरेकादशीग्राह्यापूर्वावाथपराथवा॥सर्वैरेकादशीग्राह्यादशमीपरिवर्जिता
॥दशमीसंयुताहंतिपुण्यंजन्मत्रयार्जितं॥एकादशीव्रतंपुण्यंदेवानामपिदुर्ल
भं॥किंपुनर्मनुजानांतुविष्णुलोकप्रदंभुवि॥छायाद्यानववेधायेउपोष्यंतिन
राधमाः॥तेसर्वेब्राह्मणाद्याश्चयोन्यंतरमवाप्नुयुः॥ ॥ऋषयऊचुः॥ ॥कीदृशी
सानवेछायायस्तासाकीदृशीभवेत्॥कथंवेधातिवेधोचमहावेधःकथंभवे
त्॥प्रलयश्चकथंप्रोक्तोमहाप्रलयएवच॥महाघोराथसाविद्धत्राक्षसीसाक
थंस्मृता॥एतन्मेसंशयंनूब्रह्मनूछेत्तुमर्हसिसांप्रतं॥समासेनद्विजश्रेष्ठ

नारदी० पांकुत्वाममोपरि॥ ॥नारद उवाच॥ ॥श्रूयतां द्विजशार्दूल वेधायेन वधास्मृता॥
१४९ यस्मिन्कृतेस्तु नृपश्रेष्ठ विनाशं याति किंचिवं॥ पृथक्नामानि सर्वेषां तन्मे निगदि
तः शृणु॥ द्विपंचाशद्घटिका दशमी दृश्यते यदा॥ छायावेधस्तदा ज्ञेया नंदा हरिदिने यदा
भवेत्॥ त्रिपंचाशद्घटापूर्णा ग्रस्ता एव तु गीयते॥ चतुःपंचाशकामानुसंपूर्णा व
ध उच्यते॥ पंचाशद्घटिकेति वेधास्यात् महावेधः षडात्मिके॥ प्रलयः सप्तपंचाश
त् महानष्टाधिके भवेत्॥ नवाधिके महाघोरा संपूर्णा राक्षसी स्मृता॥ एवमादि
चतुर्दश च वेधा विरेतिस्तु संयुता॥ आमस्तु काकालपर्यंतं मुपोष्यान कथंचन॥ द्वाद
